આ પ્રયોગ ભાવપ્રકાશ અમૃતસાગર આદિ વૈદકના પ્રસિદ્ધ ગ્રંથોમાં આપેલો છે.

## ત્રિકટવાદિ ચૂર્ણ

સુંઠ, મરી, પીંપર, ત્રિફલા, ધાણા, અજમો, શતાવરી, વજ, બ્રાહ્મી અને ભાર્ગી એ બધાનું સમભાગ ચૂર્ણ કરવું. તેનું મધની સાથે સેવન કરવાથી બાલક પણ બોલવામાં ચતુર અને વીણાના જેવો સ્વરવાળો થાય છે. આ પ્રયોગ દરમિયાન તેલવાળું, તીખું, લુખું, ખાટું, તેમજ વાયડું ખાવું નહિ.

## વૃદ્ધદારુકમૂલ ચૂર્ણ

વરધારાના મૂળને ખૂબ ઝીણું ખાંડીને ચાળી લેવું, પછી તેને શતાવરીના રસની સાત વાર ખાવના આપવી. એમાંથી ૧ તોલા જેટલું ચૂર્ણ ઘીની સાથે એક મહિનો ખાવાથી મનુષ્ય ઉત્તમ બુદ્ધિવાળો, સ્મૃતિમાન અને વલીપલીતથી રહિત થાય છે.

આ પ્રયોગ ચક્રદત્ત, વૃન્દમાધવ, ભાવપ્રકાશ, યોગ્ય રત્નાકર, આદિ ગ્રંથોમાં જણાવેલો છે.

## ધાત્રી ચૂર્ણ

આંબળાનું ચૂર્ણ ૩૫૬ તોલા લઇને તેના સ્વરસમાંજ ભીંજાવવું. પછી ૧૨૮ તોલા મધ અને ૧૨૮ તોલા ઘી, ૩૨ તોલા પીપર અને ૬૪ તોલા સાકર, એ બધું એકઘડામાં ભરીને તેને ધાન્યના ઢગલામાં એક વર્ષપર્યંત રાખી મૂકવું. એ રીતે તૈયાર થયેલી ઔષધિનું યોગ્ય પ્રમાણમાં સેવન કરવાથી મનુષ્ય પલિત રોગથી રહિત, સુંદર


Jain Education International For Private & Personal Use Only www.jainelibrary.org

રૂપ વર્ણવાળો અને પ્રભાવશાળી થાય છે; તથા વ્યાધિ રહિત બનીને, મેધા, સ્મૃતિ, બલ, રચનચાતુર્ય, દઢતા અને સત્વસંપન્નતા પ્રાપ્ત કરે છે.

ચક્રદત્ત, વૃન્દમાધવ, ભૈષજયરત્નાવલીમાં આ પ્રયોગ આપેલો છે.

### શતાવરી ચૂર્ણ

શતાવરી, ગોરખમુંડી, ગળો, હરિતકર્ણ, (આ ખાખરાનો જ એક ભેદ છે.) ખાખરો અને મુસલી એ બધાને સમભાગે મેળવીને ચૂર્ણ બનાવવું. તેને ઘી સાથે ખાવાથી બુદ્ધિ તથા સ્મરણશક્તિ ખૂબ સુધરે છે.

### કલ્યાણકાવલેહ

હળદર, વજ, કુષ્ઠ, પીંપર, સુંઠ, અજમોદ, જેઠીમધ અને સિંધવ સમભાગે લઈને તેનું ચૂર્ણ બનાવવું. તે ઘીની સાથે ચાટવાથી એકવીશ દિવસમાં માણસ શાસ્ત્રને સમજીને ધારણ કરી શકે તેવો બુદ્ધિમાન થાય છે.

### ચંદ્રપ્રભાવટી

ચંદ્રપ્રભા નં.૧ નું સેવન લાંબો વખત કરવાથી તે બુદ્ધિ અને સ્મૃતિને વધારે છે.

### અશ્વગંધાદિ અવલેહ

અશ્વગંધા, અજમોદ, કાળીપાટ, સુંઠ, મરી, લીંડીપીંપર, વરીયાળી, શતાવરી અને સિંધવ સમાન ભાગે લેવા. તે બધાના વજનથી અરધો વજ લઈને ચૂર્ણ બનાવવું. એમાંથી હંમેશા ૦॥ તોલાથી ૧ તોલા જેટલું ખાવું. તે પચી જાય ત્યારે દૂધનું ભોજન કરવું. એનાં સેવનથી સ્મૃતિ એક હજાર ગ્રંથ ધારણ કરવા જેટલી તીવ્ર બને છે.

### ચ્યવન-પ્રાશાવલેહ

અષ્ટવર્ગયુક્ત ચ્યવનપ્રાશાવલેહ રોજ સવારે ૧ તોલા જેટલો લઈ, ઉપર દૂધ પીવાથી મગજ પુષ્ટ થઈ સ્મૃતિમાં સુધારો થાય છે. આ પ્રઓગ ઓછામાં ઓછો ત્રણ માસ પર્યંત કરવો જોઈએ. તેને બનાવવાની રીત કોઈપણ પ્રસિદ્ધ આયુર્વેદિક ગ્રંથમાંથી મળી શકશે.

### રસો

બૃહદ સુવર્ણમાલિની, વસંતકુસુમાકર રસ, તથા પૂર્ણ ચંદ્રોદય, એ ત્રણ પૈકી કોઈનું પણ વિધિપૂર્વક સેવન કરવાથી બુદ્ધિ સતેજ થાય છે અને સ્મૃતિ સુધરે છે.

### બુદ્ધિવર્ધક ચાટણ

૧૦૦ સુકા ગુંદા, ૧૦૦ ઉનાબ, તથા ૩ તોલા ગુલેબનફશા લઈને એક વાસણમાં ૧૨ કલાક સુધી પલાળી રાખવા. પછી તેમાંથી પાણી નીચોવી લઈ તેનો કાઢો કરવો, જે ૦॥ રતલના આશરે રહેવો જોઈએ. એ કાઢામાં ૧॥ રતલ હરડેના મુરબ્બાની ચાસણી, ૧ રતલ મધ અને સાકર નાખી, એકતારી ચાસણી કરવી. વધારે કડક ન થાય તેનું ધ્યાન રાખવું. તેમાં નીચેની વસ્તુઓનું બનેલું ચૂર્ણ નાખીને ખૂબ હલાવવું તથા ખૂબ ગરમ થયા બાદ નીચે ઉતારવું. ચૂલા ઉપર પાતળું દેખાશે, પણ ઠર્યા પછી તે બરાબર ચીકણું થઈ જશે.

જે ચૂર્ણને ઉમેરવાનું છે, તેની વિગત :-

| | | |
|---|---|---|
| રંગારી હરડે | - | તોલા ૨ |
| કાબુલી હરડે | - | તોલા ૨ |
| બાળ હરડે | - | તોલા ૨ |
| ધાણાં | - | તોલા ૨ |
| વંશલોચન | - | તોલા ૨ |
| ગુલેબનફશા | - | તોલા ૨ |
| નસોત | - | તોલા ૨ |
| ગુંદ સારો | - | તોલા ૦॥ |
| ચંદનનો ભૂકો | - | તોલા ૦॥ |
| બ્રાહ્મી | - | તોલા ૨ |
| શંખાવલી | - | તોલા ૦॥ |
| એલચી | - | તોલા ૦॥ |

આ ચૂર્ણને ૧૫ તોલા મીઠા બદામનું તેલ કાઢીને તેનો કરમો દેવો.

સવારમાં ૦॥ તોલાથી ૧ તોલા પર્યંત ચાટવાથી મગજના તમામ રોગ મટાડે છે તથા બુદ્ધિ અને સ્મૃતિને તેજ કરે છે.

આ પ્રયોગ ઘણા પર અજમાવેલો છે.

## બુદ્ધિ-વર્ધક સરસ્વતી-વિધાન

૧.ગાયનું ઘી - ૧ શેર, (સહિજન) ની જડ ૧ તોલો, ૧૫ ગ્રામ મીઠી વચ, ૧૫ ગ્રામ સિંધાલૂણ, ધવડી (ધવઈ) ના ફૂલ લોધ-બધું પીસીને ૪ શેર બકરીના દૂધમાં ઘી નાંખી ધીમા તાપે ઉકાળવું. જ્યારે દૂધ અને દવા બળી જાય, ત્યારે ઘી ગળી લેવું. એક તોલા ઘીનું સેવન, સરસ્વતી-મંત્ર દ્વારા કરે તો બુદ્ધિ, સ્મૃતિ, મેધા, કાન્તિ ખૂબ વધે.

સરસ્વતી મંત્ર : ૐ હ્રાં ઐં હ્રીં ૐ સરસ્વત્યૈ નમઃ (૧૨ હજાર જાપથી પુરશ્ચરણ)

૨.હળદર, દળેલુ મીઠું, પીપરામૂળ, સૂંઠ, જીરૂં, આજમો, (મૂલેઠી), (સહુઆ, સિંધાલૂણ ૨૫-૨૫ ગ્રામ લઈને ચૂર્ણ કરવું. ૪ ગ્રામ ઘી સાથે ખાવાથી બુદ્ધિ વધે.

૩. સારસ્વત ચૂર્ણ- (ગુરુચિ), (અપામાર્ગ), (ચિચિરી), વાવડીંગ, શંખપુષ્પી (કોડિહાર), મીઠી વચ, હરડે, દળેલું, મીઠું, શતાવરી-બધું સપ્રમાણ લઈ ચૂર્ણ કરવું. ઘી સાથે ખાવાથી બુદ્ધિ વધે.

૪. સોની સળીથી અથવા કુશા ની જડથી ગંગાજળ દ્વારા, આઠમ અથવા ચૌદશને દિવસે જીભપર ઐં બીજ લખવો.

૫. હંસારૂઢા માઁ સરસ્વતીનું ધ્યાન કરી માનસ પૂજા પૂર્વક નીચેનો મંત્ર ૨૧ વાર જપવો. - ૐ ઐં ક્લીં સૌઃ હ્રીં શ્રીં ધ્રીં વદ વદ વાગ્વદિની સૌઃ ક્લીં ઐં શ્રી સરસ્વત્યૈ નમઃ ।

જાપ-ફળ માના હાથમાં અર્પિત કરો. ત્યારે નીચેના સ્તોત્રનો એકવાર નિત્ય-પાઠ કરવો. બન્ને પખવાડિયાઓની તેરસના દિવસે ૨૧ વાર સ્તોત્રનો પાઠ કરવો. સરસ્વતી કંઠમાં વાસ કરે છે.

સંપૂર્ણ.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ..... परिशिष्ठ विभाग .....

## श्रीबप्पभट्टिसूरिकृत
## श्री सरस्वतीकल्प-स्तोत्रम् ।

शार्दूल. स्नातस्या प्रतिम.......

अन्तः कुण्डलिनि प्रसुप्तभुजगाकारस्फुरद्विग्रहां,
शक्तिं कुण्डलिनीं विधाय मनसा हुंकारदण्डाहताम् ।
षट्चक्राणि विभिद्य शुद्धमनसां प्रद्योतनद्योतनीं,
लीनां ब्रह्मपदे शिवेन सहितामेकत्रलीनां स्तुमः ॥१॥

कन्दात् कुण्डलिनि ! त्वदीयवपुषा निर्गत्य तन्तुत्विषा,
किञ्चिच्चुम्बितमम्बुजं शतदलं त्वद्ब्रह्मरन्ध्रादधः ।
यश्चन्द्रद्युति ! चिन्तयत्यविरतं भूयोऽत्र भूमण्डले,
तन्मन्ये कविचक्रवर्तिपदवीच्छत्रच्छलाद् वल्गति ॥२॥

यस्त्वद्वक्त्रमृगाङ्कमण्डलमिलत्कान्तिप्रतानोच्छल-
च्चञ्चच्चन्द्रकचक्रचित्रितककुप्कन्याकुलं ध्यायति ।
वाणी[१] ! वाणि विचित्रभङ्गुरपद-प्रागल्भ्यश्रृङ्गारिणी,
नृत्यत्युन्मदनर्तकीव सरसं तद्वक्त्ररङ्गाङ्गणे ॥३॥

देवि ! त्वद्धृतचन्द्रकान्तकरकश्च्योतत्सुधानिर्झर-
स्नानानन्दतरङ्गितं पिबति यः पीयूषधारारसम् ।
तारालंकृतचन्द्रशक्तिकुहरेणाकण्ठमुत्कण्ठितो,
वक्त्रेणोद्गिरतीव तं पुनरसौ वाणीविलासच्छलात् ॥४॥

क्षुभ्यत्क्षीरसमुद्रनिर्गतमहाशेषाहिलोलत्फणा-
पत्रोन्निद्रसितारविन्दकुहरैश्चन्द्रस्फुरत्कर्णिकैः ।
देवि ! त्वां च निजं च पश्यति वपु र्यः कान्तिभिन्नान्तरं,
ब्राह्मि ! ब्रह्मपदस्य वल्गति वचः प्रागल्भ्यदुग्धाम्बुधेः ॥५॥

नाभीपाण्डुरपुण्डरीककूहराद् हृत्पुण्डरीके गलत् -
पीयूषद्रववर्षिणि ! प्रविशतीं त्वां मातृकामालिनीम् ।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यया,
निर्ग्रन्थोऽपि शतान्यपि ग्रथयति ग्रन्थायुतानां नरः ॥६॥

त्वां मुक्तामयसर्वभूषणधरां शुक्लाम्बराडम्बरां,
गौरीं गौरिसुधांतरङ्गधवलामालोक्य हृत्पङ्कजे ।
वीणापुस्तकमौक्तिकाक्षवलयश्वेताब्जवल्गत्करां,
न स्यात् कः शुचिवृत्त-चक्ररचनाचातुर्यचिन्तामणिः ॥७॥

पश्यन् त्वां तनुमिन्दुमण्डलगतां त्वां चाभितो मण्डितां,
यो ब्रह्माण्डकरण्डपिण्डितसुधाडिण्डीरपिण्डैरिव ।
स्वच्छन्दोद्गतगद्यपद्यलहरी लीलाविलासामृतैः,
सानन्दास्तमुपाचरन्ति कवयश्चन्द्रं चकोरा इव ॥७॥

तद्वेदान्तशिरस्तदोङ्कृतिमुखं तत् तत्कलालोचनं,
तत्तद्वेदभुजं तदात्महृदयं तद्गद्यपद्यांऽह्रि च ।
यस्त्वद्वर्ष्म विभावयत्यविरतं वाग्देवि ! तद् वाङ्मयं,
शब्दब्रह्मणि निष्ठितः स परमब्रह्मैकतामश्नुते ॥८॥

वाग्बीजं स्मरबीजवेष्टितमतो ज्योतिःकला भृद्बहि-
रष्टद्वादश-षोडशद्विगुणितंद्वयष्टाब्जपत्रान्वितम् ।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे,
हंसः कूटयुतं भवेदवितथं यन्त्रं तु सारस्वतम् ॥९॥

ॐ ह्रीं श्रीं स(ह)ह्रीं सबीजकलितां वाग्वादिनीदेवतां,
गीर्वाणासूरपूजितामनुदिनं काश्मीरदेशेभवाम् ।
अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं,
बुद्धिज्ञानविचारसार सहितः स्याद् देव्यसौ साम्प्रतम् ॥१०॥

स्मृत्वा मन्त्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोत्थं,
श्वेतस्निग्धोर्ध्वनालं हृदि च विकचतां बाष्प निर्यातमास्यात् ।
तन्मध्ये चोर्ध्वरुपामभयदवरदां पुस्तकाम्भोजपाणिं,
वाग्देवीं त्वन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम्
॥११॥ स्रग्धरा.

किमिह बहुविकल्पैर्जल्पितैर्यस्य कण्ठे,
भवति विमलवृत्तस्थूलमुक्तावलीयम् ।
भवति भवति ! नाथे ! भव्यभाषाविशेषै,
र्मधुरमधुसमृद्धस्तस्य वाचां विशेषः ॥१२॥ मालिनी.

सम्पूर्णम्

### श्री बप्पभट्टिसूरिकृत सरस्वती मन्त्रकल्प

अथ मन्त्रक्रमो लिख्यते - ॐ सरस्वत्यै नमः । अर्चनमन्त्रः

ॐ भूरिसी भूतधात्री भूमिशुद्धिं कुरु कुरु स्वाहा । भूमिशुद्धिमन्त्रः ।
ॐ विमले ! विमलजले ! सर्वतीर्थजले ! पां वां ज्वीं ज्वीं अशुचिः शुचीर्भवामि स्वाहा ! आत्मशुद्धिमन्त्रः ।
ॐ वद वद वाग्वादिनी ह्रीं शिरसे नमः ।
ॐ महापद्मयशसे ह्रीं योगपीठाय नमः ।
ॐ वद वद वाग्वादिनी ह्रूँ शिखायै वषट् ।
ॐ वद वद वाग्वादिनी नेत्रद्वयाय वषट् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ वद वद वाग्वादिनी कवचाय हुं।
ॐ वद वद वाग्वादिनी। अस्त्राय फट्। इति सकलीकरणम्।
ॐ अमृते! अमृतोद्भवे! अमृतं स्त्रावय ऐं क्लीँ ब्लूँ द्रां द्रीं द्रावय द्रावय स्वाहा।
यो जपेज्जातिकापुष्पैर्भानुसंख्यसहस्त्रकम्।
दशांशहोमसंयुक्तं च स्याद् वागीश्वरीसमः ॥१॥
महिषाख्यगुग्गुलेन प्रविनिर्मितचनकमात्रसद्गुटिकाः।
होमस्त्रिमधुरयुक्तः तुष्टा देवी वरं दत्ते ॥२॥ इति शुद्धं श्रीसारस्वतम्।
अथैतत्पीठक्रमो लिख्यते -

पद्मोपरि पद्मासनस्था भगवतीमूर्तिः करचतुष्टयधृतवरपद्मा शिरसि षट्कोणाकारमुकुटभ्राजति नाभौ चतुर्दलपद्मधारिणी लेख्या। ततो नाभिपद्मे कर्णिकायां ॐ कारं लिखेत्, पूर्वादिचतुर्दलेषु न १ मः २ सि ३ द्धं ४ इत्यक्षराणि लेख्यानि। अधस्तनदक्षिणकरे षोडशदलं पद्मं कृत्वा तत्र कर्णिकायां ऐंकारं दत्त्वा पूर्वादिषोडषदलेषु क्रमेण षोडश स्वरान् लिखेत्, अधस्तनवामकरे पञ्चविंशतिदलं पद्मं कृत्वा तत्कार्णिकायां श्रीकारं विलिख्य पूर्वादिपञ्चविंशतिदलेषु (क्रमेण) क्रमात् कादयो वर्गवर्णाः पञ्चविंशतिलेख्याः। अथवोपरितन-दक्षिणकरे अष्टदलं पद्मं कृत्वा तत्र कर्णिकायां सौं इति बीजं लिखित्वा पूर्वादिदलेषु य - र - ल - व - श - ष - स - ह - इत्यष्टौ वर्णा लेख्याः। उपरितनवामकरेऽप्यष्टदलं पद्मं कृत्वा तत्कर्णिकायां क्लीं इति बीजं दत्वा पूर्वाद्यष्टदलेषु व १ द २ व ३ द ४ वा ५ ग्वा ६ दि ७ नि ८ पूर्वादिकोणषट्के स १ र २ स्व ३ त्यै ४ न ५ मः ६ एवमक्षरषट्कं लेख्यम्। सर्वं शुक्लध्यानेन षट्चक्रस्थापनं विधाय ध्येयम्।

मूलमन्त्रश्चायम् - ॐ ऐं श्रीं सौं क्लीं वद वद वाग्वादिनी ह्रीं सरस्वत्यै नमः। इति पाठशुद्धया मन्त्रं स्मरेत्, करजापो लक्षं जातिपुष्पैः सहस्त्राः १२ जापः। गुग्गुलगुटी १२०० त्रिमधुरमिश्राः कृत्वा होमः कार्यः, आश्विने चैत्रे वा नवरात्रेषु कार्य दीपोत्सवाऽमावास्यां वा ततः सिद्धिः॥

आम्नायान्तरेण यन्त्रं लिख्यते, यथा-

वृत्तं मण्डलं कृत्वा परितः पूर्वादौ चत्वारि दलानि, तत्र पूर्वदले ॐ ह्रीं देवतायै नमः १, दक्षिणदले ॐ ह्रीं सरस्वत्यै नमः २, पश्चिमदले ॐ ह्रीं भारत्यै नमः ३, उत्तरदले ॐ ह्रीं कुम्भदेवतायै नमः ४,

तद्बहिरष्टदले, तत्र पूर्वादितः ॐ मोहे यः १, ॐ नन्दे यः २, ॐ भद्रे यः ३, ॐ जये यः ४, ॐ विजये यः ५, ॐ अपराजिते यः ६, ॐ जम्भे यः ७, ॐ स्तम्भे यः ८, इति लेख्यम्। तद्बहिः षोडशदलानि, तत्र-ॐ रोहिण्यै नमः १, ॐ प्रज्ञप्त्यै नमः २, इत्यादिषोडश देवीनामानि लेख्यानि, तद्बहिः पुनरष्टदलानि, पूर्वदले ॐ ह्रीं इन्द्राय नमः १ क्रमेण ॐ ह्रीं अग्नये नमः २, ॐ ह्रीं यमाय नमः३, ॐ ह्रीं नैऋतये नमः ४, ॐ ह्रीं वरुणाय नमः ५, ॐ ह्रीं वायवे नमः ६, ॐ ह्रीं कुबेराय नमः ७, ॐ ह्रीं ईशानाय नमः ८ इति लिखेत्। ततो मायया त्रिरभिवेष्ट्य क्रोँ कारेण निरुध्य परितः पृथ्वीमण्डलं कोणेषु प्रत्येकं चतुर्वज्राङ्किकतं कृत्वा मध्यकोणेषु लं प्रत्येकं लिखेत्। इति यन्त्रविधिः।

यन्त्रमध्ये मन्त्रो भगवतीमूर्तिर्वा लेख्या।

मन्त्रश्चायम् - ॐ ऐं ह्रीं श्रीं वद वद वाग्वादिनी! भगवति! सरस्वति! ह्रीं नमः। एतन्मन्त्रस्य पूर्वसेवा करजप्यः लक्षं जातीपुष्प जातिश्च १२००० ततो दशांश होमो घृतगुग्गुलमधुखण्डैर्जपि-तपुष्पमध्यात् १२००० पुष्पाणि गृहीत्वा गुटिका संचूर्ण्यते। मन्त्रदानं दीपोत्सव एव गर्भे मन्त्रो मूर्तिर्वा भगवत्या लिख्यते यन्त्रस्योभयथापि कार्यम्। जापे नमः। होमे स्वाहा। इति श्रीबप्पभट्टिसूरेराम्नायः।

अथ पुनः श्री बप्पभट्टिसूरिविद्याक्रमे महापीठोद्धारो लिख्यते - ऐं क्लीँ ह्सौँ: पूर्ववक्त्रायने नमः, १ ऐं क्लीँ ह्सौँ: दक्षिणवक्त्राय नमः २, ऐं क्लीँ ह्सौँः पश्चिमवक्त्राय नमः ३, ऐं क्लीँ ह्सौँः उत्तरवक्त्राय नमः ४, ऐं क्लीँ ह्सौँः ऊर्ध्ववक्त्राय नमः ५ - वक्त्रपञ्चकम्।

ऐं हृदि कमलायै हृदयाय नमः १, ऐं शिर कुलायै नमः, ऐं शिरसे स्वाहा २, ऐं शिखकुलायै शिखायै वौषट् ३, ऐं कवचकुलाय कवचाय नमः ४, ऐं नेत्रायै नेत्रत्रयाय वषट् ५, ऐ अस्त्रकुलायै अस्त्राय फट् ६, अ ऐ अङ्गसकलीकरणम्। इति करन्यासः, अङ्गन्यासः, पात्रपूजा, आत्मपूजा, मण्डलपूजा, ततः आह्वानं स्थापनम्।

सन्निधानं सन्निरोधमुद्रा - दर्शनयोनिमुद्रा - गोस्तनमुद्रा - महामुद्रा इति मुद्रात्रयं दर्शयेत्, ततो जापः कार्यः। यथाशक्तया करजापेन लक्षजापः। पुष्पजापे चतुर्विंशति सहस्त्राणि दशांशेन होमः। पूजापुष्पाणि कुट्टयित्वा गुग्गुलेन गुटिका घृतेन घोलयित्वा होमयेत्, त्रिकोणकुण्डे हस्तमात्रविस्तारे खाते च ततः सिद्धयति।
ऐं क्लीँ ह्सौँ वद वद वाग्वादिनी। ह्रीं नमः। मूलमन्त्रः॥
वाग्भवं प्रथमं बीजं द्वितीयं कुसुमायुधम्।
तृतीयं जीवसंज्ञं तु सिद्धसारस्वतं पुनः ॥१॥
वाग्बीजं स्मरबीजवेष्टितमतो ज्योतिःकला तद्बहि-
रष्टद्वादशषोडशद्विगुणितंद्वयष्टाब्जपत्रान्वितम्।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे
हंसः कूटयुतं भवेदवितथं यन्त्रं तु सारस्वतम् ॥२॥
स्मृत्वा मन्त्रं सहस्त्रच्छदकमलमनुध्याय नाभीहृदोत्थं
चेतः स्निग्धोध्दनालं हृदि च विकचतां प्राप्य निर्यातमास्यात्।
तन्मध्ये चोर्ध्वरुपामभयदवरदां पुस्तिकाम्भोजपाणिं
वाग्देवीं त्वन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम् ॥३॥
ततो मध्ये साध्यनाम ततोऽष्टदलेषु अष्टौ पिठाक्षराणि क्म्ल्व्यूँ
च्म्ल्व्यूँ ट्म्ल्व्यूँ त्म्ल्व्यूँ प्म्ल्व्यूँ य्म्ल्व्यूँ श्म्ल्व्यूँ ह्म्ल्व्यूँ इति
ततो द्वादशदलाक्षराणि यथा कं कः, चं चः, टं टः, तं तः, पं पः, यं यः, रं रः, लं लः, वं वः, शं शः, षं षः, सं सः, इति।

ह्स्वास्तु भैरवाः प्रोक्ता दीर्धस्वरेण मातरः।
असिताङ्गो रुरुश्चण्डः क्रोध अष्टौ हि भैरवाः॥

ब्रह्माणी माहेश्वरी कौमारी वाराही वैष्णवी चामुण्डा चण्डिका महालक्ष्मीः इत्यष्टौ मातरः। एवं षोडशदलेषु बीजाक्षराणि


Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा-अह्सौँ आह्सौँ इह्सौँ ईह्सौँ उह्सौँ ऊह्सौँ ऋह्सौँ ॠह्सौ
लृह्सौँ ॡह्सौँ एह्सौँ ऐह्सौँ ओह्सौँ औह्सौँ अंह्सौँ अःह्सौँ।
ततोऽपि द्विकाधिकत्रिंशद्दलानि - कह्सौँ खह्सौँ गह्सौँ घह्सौँ
ङह्सौँ चह्सौँ छह्सौँ जह्सौँ झह्सौँ ञह्सौँ टह्सौँ ठह्सौँ डह्सौ
ढह्सौँ णह्सौँ तह्सौँ थह्सौँ दह्सौँ धह्सौँ नह्सौँ पह्सौँ फह्सौँ
बह्सौँ भह्सौँ मह्सौँ यह्सौँ रह्सौँ लह्सौँ वह्सौँ शह्सौँ षह्सौँ
सह्सौँ ३२

प्रत्यन्तरे तु अस्मिन् द्वात्रिंशद्दलकोष्ठेषु ककारादिवर्णानामग्रे बीजाक्षरलेखने पाठान्तरं दृश्यते तदपि लिख्यते। यथा -
कद्रयौँ : खद्रयौँ : गद्रयौँ : घद्रयौँ : ङद्रयौँ : चद्रयौँ : छद्रयौँ :
जद्रयौँ : झद्रयौँ : ञद्रयौँ : टद्रयौँ : ठद्रयौँ : डद्रयौँ : ढद्रयौँ : णद्रयौँ :
तद्रयौँ : थद्रयौँ : दद्रयौँ : धद्रयौँ : नद्रयौँ : पद्रयौँ : फद्रयौँ : बद्रयौँ :
भद्रयौँ : मद्रयौँ : यद्रयौँ : रद्रयौँ : लद्रयौँ : वद्रयौँ : शद्रयौँ : षद्रयौँ :
सद्रयौँ : ३२ इति प्रत्यन्तरपाठान्तरेक्रमः। ततश्चतुःषष्टिदलानि

| | |
|---|---|
| आलाई ईवाई ऊशाई ऋषाई लृसाई एहाई औळाई अंक्षाई | १ |
| आवाई ईशाई ऊषाई ऋसाई लृहाई ऐळाई औक्षाई अंलाई | २ |
| आवाई ईषाई ऊसाई ऋहाई लृळाई ऐक्षाई औलाई अंवाइ | ३ |
| आषाई ईसाई ऊसाई ॠक्षाई लृक्षाई ऐलाई औवाई अंशाई | ४ |
| आभाई ईहाई ऊळाई ॠक्षाई लृलाई ऐवाई औशाई अंषाई | ५ |
| आहाई ईळाई ऊक्षाई ॠलाई लृवाई ऐशाई औषाई अंसाई | ६ |
| आळाई ईक्षाई ऊलाई ॠवाई लृशाई ऐषाई औसाई अंहाई | ७ |
| आक्षाई इलाई ऊवाई ॠशाई लृषाई ऐसाई औहाई अंळाई | ८ |

एवं षष्टिः खीलनानि दलेषु ततोऽपि दलानि। दलेषु ऐं ३ दुर्गे। दुर्गदर्शने नमः। ऐं ३ चामुण्डे। चण्डरूपधारिण्यै नमः।

ऐं ३ जम्भे नमः। ऐं ३ मोहे नमः। ऐं ३ स्तम्भने नमः। ऐं ३ आशापुरायै नमः। ऐं ३ विद्युज्जिह्वे। नमः। ऐं ३ कुण्डलिनी नमः।

(ऐं) ह्रीं कारवेष्टितं क्रोंकारनिरुद्धं ऐं ३ भूरिसी भूतधात्री भूमिशुद्धिं कुरु कुरु स्वाहा। भूमिशुद्धिमन्त्रः।

ऐं विमले। विमलजलाय सर्वोदकैः स्नानं कुरु कुरु स्वाहा। स्नानमन्त्रः।

मंतपयारो एसो हयारपुव्वि त्ति सोयमग्गम्मि।
सो च्चिय सयारपुव्वो विज्जानेओ कुले होइ॥
..... जीवं दक्षिणवाचयोगसमन्वितम्।
सिद्धसारस्वतं बीजं सद्यो वै वचःकारः॥

शुचिप्रदेशे पटे पट्टे वा श्रीखण्डेन कर्पूरेण वा देव्या मूर्तिं कमलासनस्थां देवीचरणसमीपे योजितकरां स्वमूर्तिं च आलिख्य देवीप्रतिमांचाग्रतोविन्यस्य देवीपूजापूर्वकं यथाशक्ति श्रीखण्डजाति कुसुमसुगन्धधूपफलनैवेद्यजल प्रदीपाक्षतादिभिः साधकः पूजयेत्। स च स्नानकं च स्नानं वा कृत्वा शुचिवेषः समुपविशेत्। ततश्च 'ॐ विमलाय विमलचित्ताय पां वां क्षां ह्रीं स्वाहा' अनेन मन्त्रेण वार ३ शिरः प्रदेशात् चरणौ यावत् हस्ताभ्यां मन्त्रस्नानं कुर्यात् चन्द्रकिरणैर्दुग्धकर्पूरैर्वा आत्मानमभिषिच्यमानं चिन्तयेत्।

'ॐ भूरिसि! भूतधात्री भूमिशुद्धिं कुरु कुरु हुं फट् स्वाहा' अनेन मन्त्रेण वार भूमिशुद्धिं कुर्यात्। ततः - ''ॐ ४ एहि एहि वार'' अनेन मन्त्रेण आह्वानं कुर्यात्। द्रव्यतो भावतश्च देव्याह्वाननं स्थापना च कार्या। ततः क्षि पद्मासने, प नाभिप्रदेशे, ॐ हृदये, स्वा नासिकायाम्, हा शिरःप्रदेशे एभिर्मन्त्रपदैरारोहक्रमेण ततश्च हा ५ ललाटे, स्वा ८ नासिकायाम्, ॐ ८ हृदये, प १३ नाभौ, क्षि ५ पद्मासने एभिरेव मन्त्राक्षरैरात्मरक्षां कुर्यात्, चतुर्दिशं नखच्छोटिकां च शिखाबन्धं विदध्यात्। ततो गुरूपदिष्टध्यानपूर्वकं मूलमन्त्रं जपेत्। मूलमन्त्रस्य सहस्र १२ करजापे ततःपुष्पजापे सहस्र १२ दशांशेन द्वादशशतैः एक दिवसमध्ये होमः कार्यः कथित जापश्च अष्टदिनानां मध्ये कार्यः उत्तरक्रियां करजापे सहस्र १२। पुष्पजापसत्कानि पुष्पाणि छायाशुष्काणि सञ्चूर्ण्य गुग्गुलेन सह चणकप्रमाणा गुटिकाः कृत्वा दुग्धघृतखण्डमध्यादाकृष्य ध्यानपूर्वं च होमयेत् खदिराङ्गारैः पलाशसमिद्भिश्च वैश्वानरः प्रथमं ज्वलन् कार्यः। पूजानन्तरम् - ॐ यः विसर्जनमन्त्रः लक्षजापे दिननियमो नास्ति, तत्रापि पूर्वविधिना दशांशेन होमः कार्यः, करजापे लक्ष १, पुष्पजापे लक्ष१, होमसहस्रा १० उत्तर क्रिया कर जाप लक्ष १ सिद्धि यावत् साधकः साधयेत्। ब्रह्मचर्य-भूमिशयनं वृक्षशयनं वा। एकवारभोजनं आम्ललवणवर्जं च कुर्यात्। स्वप्नेऽपि वीर्यच्युतौ मूलतो गच्छति, अतोऽनवरतं एलचीप्रभृतिवीर्यापहारकं भक्षयेत्।

होमकुण्डं अङ्गुलं १६, विस्तारे अङ्गुल १२

अ ॐ स्वाहा कुण्डस्य स्थापना।
आ ॐ स्वाहा मृत्तिकासंस्कारः।
इ ॐ स्वाहा जलसंस्कारः।
ई ॐ स्वाहा गोमयसंस्कारः।
उ ॐ स्वाहा उभयसंयोगसंस्कारः।
ऊ ॐ लिम्पनसंस्कारः।
ऋ ॐ स्वाहा दहनसंस्कारः।
ॠ ॐ शोषणसंस्कारः।
लृ ॐ स्वाहा अमृतलावणसंस्कारः।
ॡ ॐ स्वाहामन्त्र पूतसंस्कारः।
ए ॐ इन्द्रासनाय नमः।
ऐं ॐ स्वाहा अनलदेवतासनाय नमः।
ओ ॐ यमाय स्वाहा।
औ ॐ नैर्ऋताय स्वाहा।
अं ॐ वरुणाय स्वाहा।
अं ॐ वायवे स्वाहा।
अं अः ॐ धनदाय स्वाहा।
अं अः ॐ ईशानाय स्वाहा।
ळं ॐ कुण्डदेवतायै स्वाहा।
क्षं ॐ स्वाहा एवं कुण्डसंस्कारः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ जातवेदा आगच्छ आगच्छ सर्वाणी कार्याणि साधय साधय (साधय) स्वाहा। आह्वाननम्।

२ ॐ जलेन प्रोक्षणम्। २ ॐ अभ्रोक्षणम्। २ ॐ त्रिर्मार्जनम्। २ ॐ सर्वभस्मीकरणम्।

२ ॐ क्रव्यादजिह्वां परिहरामि। दक्षिणदिशि पुष्पं भ्रामयित्वा क्षेपणीयम्।

### अथवैश्वानररक्षा-

ॐ हृदयाय नमः, ॐ शिरसे स्वाहा,। वैश्वानररक्षा।

जिह्वा - चतुर्भुज - त्रिनेत्र - पिङ्गलकेश - रक्तवर्णं - तस्य नाभिकमले मन्त्रो न्यसनीयः। होतव्यं द्रव्यं तस्मै उपतिष्ठते।

वैश्वानराहूतिः ॐ जातवेदाः सप्तजिह्व ! सकलदेवमुख ! स्वधा ! वार २१ आहूतिः करणीया। म्ल्व्र्यूँ बहुरुपजिह्वे। स्वाहा होमात् पूर्णाहूतिः मूलमन्त्रेण देव्यै साङ्गायै सपरिकरौ समस्तवाङ्मयसिद्ध्यर्थे द्वादशशतानि जापपुष्पचूर्णगुग्गुलगुटिका पूर्णाहूतिः। स्वाहा अनेन क्रमेण वार ३ यावद् भण्यते तावदनवच्छिन्नं आज्यधारया नागवल्लीपत्रमुखेन पूर्णाहूतिः कार्या। घृतकर्षः ताम्बूलं नैवेद्यम्, यज्ञोपवीत- नवीन श्वेतवस्त्रखण्डं वा दधिदूर्वाक्षतादिभिराहूतिः करणीया।

### अथ विसर्जनम्-

मूलमन्त्रेण साङ्गायै सपरिवारायै देव्यौ सरस्वत्यै नमः - अनेन मन्त्रेण आत्महृदयाय स्वाहा। वैश्वानरनाभिकमलात् देवी ध्यानेनात्मनि संस्करणीया पश्चाद् ॐ अस्त्राय फट् इति मन्त्रं वारचतुष्टयं भणित्वा वार ४ अग्निविसर्जनं कार्यम्।

ॐ क्षमस्व क्षमस्व भस्मना तिलकं कार्यम्।

ऐं ह्रीं श्रीं क्लीं ह्सौँ वद वद वाग्वादिनी ! भगवति ! सरस्वति ! तुभ्यं नमः।

### इति सारस्वतं समाप्तम्।

अत्र श्रीबप्पभट्टिसारस्वतकल्पोक्तमाद्यं बृहद्यन्त्रम्, इदं च द्वितीयमपि यन्त्रं आम्नायान्तरे दन्दृश्यते। गुरुक्रमेण लब्ध्वा पूजनीयम्। सर्व तत्वमिदं पाठतस्तु

वाग्बीजं स्मरबीजवेष्टितमतो ज्योतिः कला तद्बहि-
श्चाष्टद्वादशषोडशद्विगुणितं द्वयष्टाब्जपत्रान्वितम्।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे
हंसः कूटयुतं भवेदवितथं यन्त्रं तु सारस्वतम्।

### इति मूलकाव्यं यन्त्रोद्धारसूचकम्।

तथा-

ॐ ऐं श्रीमनु सौँ ततोऽपि च पुनः क्लीँ वदौ वाग्वादिनी
एतस्मादपि ह्रीं ततोऽपि च सरस्वत्यै नमोऽदः पदम्।
अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं
बुद्धिज्ञानविचारसारसहितः स्याद्देव्यसौ साम्प्रतम्।।

### इति मूलमन्त्रोद्धारकाव्यं च।

तथापि गुरुक्रमवशतः पाठान्तराणि दृश्यन्ते तत्र गुरुक्रम एव प्रमाणम्। भक्तानां हि सर्वेऽपि फलन्तीति।

ॐ ह्रीं असिआउसा नमः अर्हं वाचिनि ! सत्यवाचिनि ! वाग्वादिनी वद वद मम वक्त्रे व्यक्तवाचया ह्रीं सत्यं ब्रूहि ब्रूहि सत्यं वद वद अस्खलितप्रचारं सदेवमनुजासुरसदसि ह्रीं अर्हं असिआउसा नमः स्वाहा।

लक्षजापात् सिद्धिर्बप्पभट्टिसारस्वतम्।

### इति श्रीबप्पभट्टिसारस्वतकल्पः।

वाग्भवं प्रथमं बीजं १ द्वितीयं कुसुमायुधम्।
तृतीयं जीवसंज्ञं च सिद्धसारस्वतं स्मृतम्।।
जीवसंज्ञं स्मरेद् गुह्ये वक्षसि (वक्षस्थले) कुसुमायुधम्।
शिरसि वाग्भवं बीजं शुक्लवर्णं स्मरेत् त्रयम्।। त्रयं-बीजत्रयमित्यर्थः।

ॐ ह्रीं मण्डले आगच्छ आगच्छ स्वाहा। आह्वानम्।

ॐ ह्रीं स्वस्थाने गच्छ गच्छ स्वाहा विसर्जनम्।

ॐ अमृते ! अमृतोद्भवे ! अमृतमुखि ! अमृतं स्त्रावय स्त्रावय ॐ ह्रीं स्वाहा इति सकलीकरणम्। इति शारदाकल्पः।

ॐ नमो भगवओ अरिहओ भगवईए वाणीए वयमाणीए मम सरीरं पविस पविस निस्सर निस्सर स्वाहा।

लक्षं जापः ! वाक्सिद्धिः फलति।

ॐ नमो हिरीए बंभीए भगवईए सिज्जउ मे भगवई महाविज्जा ॐ बंभी महाबंभी स्वाहा। लक्षं पूर्वसेवायां जपः, तत्र त्रिसन्ध्यं सदा जपः।

क्षिप ॐ स्वाहेति पञ्चतत्त्वरक्षा पूर्वं कार्या। प्राङ्मुखं च ध्यानम्। एष विधिः सर्वसारस्वतोपयोगी ज्ञेयः।

नमो अरिहंताणं, नमो सिद्धाणं, नमो आयरियाणं, नमो उवज्झायाणं, नमो लोए सव्वसाहूणं। नमो भगवईए सुअदेवयाए संघसुअमायाए बारसंगपवयण-जणणीए सरस्सईए सच्चवाइणि ! सुवण्णवण्णे ओअर ओअर देवी मम सरीरं पविस पुच्छंतस्स मुहं पविस सव्वजणमणहरी अरिहंतसिरी सिद्धसिरी आयरियसिरी उवज्झायसिरी सव्वसाहुसिरी दंसणसिरी नाणसिरी चारित्तसिरी स्वाहा। सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः। अनेन मन्त्रेण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कच्चोलकस्थं कंगुतैलं गजवेलक्षुरिकया वार १००८ अष्टोत्तरसहस्त्रं अथवा अष्टोत्तरशतं अभिमन्त्र्य पिबेत् महाप्रज्ञाबुद्धिः प्रैधते । अनेन ब्राह्मीवचाऽभिमन्त्र्य भक्षणीया वाक्सिद्धिः । तथा पर्युषणापर्वणि यथाशक्ति एतत्स्मरणं कार्यं महैश्वर्यं वचनसिद्धिश्च ।

ॐ नमो अणाइनिहणे तित्थयरपगासिऐ गणहरेहिं अणुमण्णिए द्वादशाङ्गचतुर्दशपूर्वधारिणि श्रुतदेवते ! सरस्वति ! अवतर अवतर सत्यवादिनि हुं फट् स्वाहा । अनेन पुस्तिकादौ वासक्षेपः । लक्षजापे हुंफड्ग्रे च ॐ ह्रीं स्वाहा इत्युच्चारणे सारस्वतं उपश्रुतौ कर्णाभिमन्त्रणं 'नमो धम्मस्स नमो संतिस्स नमो अजिअस्स इलि मिलि स्वाहा' चक्षुः कर्णौ च स्वस्याधिवास्य परस्य वा एकान्ते स्थितो यत् श्रृणोति तत्सत्यं भवति । उपश्रुतिमन्त्रः ।।

ॐ अर्हन्मुखकमलवासिनि । पापात्मक्षयंकरि । श्रुतज्ञान-ज्वाला सहस्त्रप्रज्वलिते । सरस्वति । मत्पापं हन हन दह दह क्षां क्षीं क्षूं क्षौं क्षः क्षीरधवले ! अमृतसम्भवे ! वं वं हूं क्ष्वीं ह्रीं क्लीं ह्सौं वद वद वाग्वादिन्यै ह्रीं स्वाहा ।

चन्द्रचन्दनगुटिका दीपोत्सवे उपरागे शुभेऽह्नि वा अभिमन्त्र्य देया मेधाकरः। दक्षिणशयं स्वं स्वयं मुखे दत्वा ५/७ गुण्या क्षोभता।

चन्द्रचन्दनगुटीं रचयित्वा भक्षयेदनुदिनं सुपठित्वा .
शिष्यबुद्धिवैभवकृते विहितेयं हेमसूरिगुरुणा करुणातः ।।

ऐं क्लीं ह्रीं ह्सौं सरस्वत्यै नमः । जापः सहस्त्र ५० सारस्वतम्।

ॐ क्लीं वद वद वाग्वादिनी ! ह्रीं नमः । अस्य लक्षजापे काव्यसिद्धिः । ध्याने च भगवती श्वेतवस्त्रा ध्यातव्येति ।

समाप्तम् ।

## श्रीमल्लिषेणाचार्यविरचित :
## श्री सरस्वतीमन्त्रकल्पः

मुनि हंस वि. शास्त्र सं. वडोदरा प्रत नं. १६५८
सुरत ह. लि. ज्ञा. भं तथा भैरव पद्मावती कल्प

जगदीशं जिनं देवमभिवन्द्याभिशङ्करम् ।
वक्ष्ये सरस्वतीकल्पं समासायाल्पमेधसाम् ।।१।।

अभयज्ञानमुद्राक्षमालापुस्तकधारिणी ।
त्रिनेत्रा पातु मां वाणी जटाबालेन्दुमण्डिता ।।२।।

लब्धवाणीप्रसादेन मल्लिषेणेनसूरिणा ।
रच्यते भारतीकल्पः स्वल्पजाप्यकलप्रदः ।।३।।

दक्षो जिनेन्द्रियो मौनी देवताराधनोद्यमी ।
निर्भयो निर्मदो मन्त्री शास्त्रऽस्मिन् स प्रशस्यते ।।४।।

पुलिने निम्नगातीरे पर्वतारामसङ्कुले ।
रम्यैकान्तप्रदेशे वा हर्म्ये कोलाहलोज्झिते ।।५।।

तत्र स्थित्वा कृतस्नानः प्रत्यूषे देवतार्चनम् ।
कुर्यात् पर्यङ्कयोगेन सर्वव्यापारवर्जितः ।।६।।

तेजोवदद्वयस्याग्रे लिखेद् वाग्वादिनीपदम् ।
ततश्च पञ्च शून्यानि पञ्चसु स्थानकेष्वपि ।।७।।

ॐ वद वद वाग्वादिनी ह्रां हृदयाय नमः । ॐ वद वद वाग्वादिनी ह्रीं शिरसे नमः। ॐ वद वद वाग्वादिनी ह्रूं शिखायै नमः। ॐ वद वद वाग्वादिन ह्रौं कवचाय नमः। ॐ वद वद वागवादिनी ह्रः अस्त्राय नमः । इति सकलीकरणं विधातव्यम ।

रेफैर्ज्वलद्भिरात्मानं दग्धमग्निपुरस्थितम् ।
ध्यायेदमृतमन्त्रेण कृतस्नानस्ततत ! सुधी : ।।८।।

ॐ अमृते ! अमृतोद्भवे ! अमृतवर्षिणि ! अमृतं स्त्रावय स्त्रावय सं सं ह्रीं ह्रीं क्लीं क्लीं ब्लूं ब्लूं द्रां द्रां द्रीं द्रीं द्रूं द्रूं द्रावय द्रावय स्वाहा। स्नानमंत्रः । विनयमहा

ॐ ह्रीं पद्मयशसे योगपीठाय नमः । पीठस्थापनमन्त्रः ।
पट्टकेऽष्टदलाम्भोज श्रीखण्डेन सुगन्धिना ।
जातिकास्वर्णलेखिन्या दूर्वादर्भेण वा लिखेत् ।।९।।

ॐकारपूर्वाणि नमोऽन्तगानि शरीर-विन्यासकृताक्षराणि ।
प्रत्येकतोऽष्टौ च यथाक्रमेण देयानि तान्यष्टसु पत्रकेषु ।।१०।।

ब्रह्महोमनमःशब्दं मध्येकर्णिकमालिखेत् ।
कं कः प्रभृतिभिर्वर्णैर्वेष्टयेत् तन्निरन्तरम् ।।११।।

कं कः, चं चः, टं टः, तं तः, पं पः, यं यः, रं रः, लं लः वं वः शं शः, षं षः, सं सः, हं हः, ळं ळः, क्षं क्षः, खं खः, छं छः, ठं ठः, थं थःष फं फः गं गः, जं जः डं डः. दं दः, बं बः, घं घः, झं झः, ढं ढः, धं धः, भं भः, ङं ङः, ञं, ञः, णं णः, नं नः, मं मः, एतानि केसराक्षराणि ।

बाह्ये त्रिर्मायया वेष्ट्य कुम्भकेनाम्बुजोपरि ।
प्रतिष्ठापनमन्त्रेण स्थापयेत् तां सरस्वतीम् ।।१२।।

ॐ अमले ! विमले ! सर्वज्ञे ! विभावरि ! वागीश्वरि ! ज्वलदीधिति ! स्वाहा प्रतिष्ठापनमन्त्रः ।।

अर्चयेत् परया भक्त्या गन्धपुष्पाक्षतादिभिः ।
विनयादिनमोऽन्तेन मन्त्रेण श्रीसरस्वतीम् ।।१३।।

ॐ सरस्वती नमः ।

विनयं मायाहरिवल्लभाक्षरं तत्पुरो वदद्वितयम् ।
वाग्वादिनी च होमं वागीशा मूलमन्त्रोऽयम् ।।१४।।

ॐ ह्रीं श्रीं वद वद वाग्वादिनी स्वाहा । मूलमन्त्रः ।
यो जपेज्जातिकापुष्पैर्भानुसरव्यसहस्त्रकैः ।
दशांशहोमसंयुक्तं स स्याद् वागीश्वरीसमः ।।१५।।

महिषाक्षगुग्गुलेन प्रतिनिर्मितणकमानसद्गुटिकाः ।
होमस्त्रिमधुरयुक्तैर्वरदाऽत्र सरस्वती भवति ।।१६।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहशिरोद्रग्नासा सर्वमुखाननसुकण्ठहृन्नाभि ।
पादेषु मूलमन्त्रबीजद्वयवर्जितं ध्यायेत् ॥१७॥

श्वेताम्बरां चतुर्भुजां सरोजविष्टरस्थिताम् ।
सरस्वतीं वरप्रदामहर्निशं नमाम्यहम् ॥१८॥

साङ्ख्यभौतिकचार्वाकमीमांसक दिगम्बराः ।
सौगतास्तेऽपि देवि ! त्वां ध्यायन्ति ज्ञानहेतवे ॥१९॥

भानुदये तिमिरमेति यथा विनाशं
क्ष्वेडं विनश्यति यथा गरुडागमेन ।
तद्वत् समस्तदुरितं चिरसञ्चितं मे
देवि ! त्वदीयमुखदर्पणदर्शनेन ॥२०॥

गमकत्वं कवित्वं च वाग्मित्वं वादिता तथा ।
भारति ! त्वत्प्रसादेन जायते भुवने नृणाम् ॥२१॥

## सरस्वतीस्तवः ।

जपकाले नमःशब्दं मन्त्रस्यान्ते नियोजयेत् ।
होमकाले पुनः स्वाहा मन्त्रस्यायं सदा क्रमः ॥२२॥

सवृन्तकं समादाय प्रसूनं ज्ञानमुद्रया ।
मन्त्रमुच्चार्य सन्मन्त्री श्वासं मुञ्चीत रेचनात् ॥२३॥

वाग्भवं कामराजं च सान्तं षान्तेन संयतम् ।
बिन्द्वोङ्कारयुतं मन्त्रं त्रैपुरं तन्निगद्यते ॥२४॥

ऐं क्लीं द्व हसौं नमः ।

श्वेतैः पुष्पैर्भवेद् वाचा शोणितैर्वश्यमोहनम् ।
लक्षजापेन संसिद्धिं याति मन्त्रं सहोमतः ॥२५॥

ऐं क्लीं हसौं । मन्त्रः ।

उष्माणामादिमं बीजं ब्रह्मबीजसमन्वितम् ।
लान्तं रान्तेन संयुक्तं मायावाग्भवबीजकम् ॥२६॥

स्लीं ह्रीं ऐं सरस्वत्यै नमः ।

मन्त्रं जपति यो नित्यं जातिकाकुसुमैर्वरैः ।
रविसङ्ख्यसहस्राणि स स्याद् वाचस्पतेः समः ॥२७॥
सप्तलक्षाणि यो विद्यां मायामेकाक्षरीं जपेत् ।
तस्य सिद्ध्यति वागीशा पुष्पैरिन्दुसमप्रभैः ॥२८॥
ह्रीं झं ह्रीं जलभूबीजैर्नाम यत् तत् स्वरैर्वृतम् ।
बाह्ये द्विषड्दलाम्भोजपत्रेषु सकलं नमः ॥२९॥
सान्तं सम्पुटमालिख्य झ्वीं हंसैर्वलयीकृतम् ।
अम्भःपुरपुटोपेतं सद्भूर्जे चन्दनादिभिः ॥३०॥
सिक्थकेन समावेष्ट्य जलपूर्णघटे क्षिपेत् ।
दाहस्योपशमं कुर्याद् ग्रहपीडां निवारयेत्॥३१॥-शान्तिकयन्त्रम् ।
नाम त्रिमूर्त्तिमध्यस्थ क्लीं क्रौं दिक्षु विदिक्षु च ।
बहिर्वह्निपुटं कोठेर्ष्वौं जम्भे ! होममालिखेत् ॥३२॥

मोहापि च तथाप्रान्त ब्राह्मब्लूँकारमास्थितम् ।
ॐ ब्लैं धात्रे वषट् वेष्टयान्तर्बाह्ये क्षितिमण्डलम् ॥३३॥
फलके भूर्यपत्रे वा लिखित्वा कुङ्कुमादिभिः ।
पूजयेद् यः सदा यन्त्रं सर्वं तस्य वशं जगत् ॥३४॥ वश्ययन्त्रम् ॥
मान्तं नामयुतं द्विरेफसहितं बाह्ये कलावेष्टितं
तद्बाह्येऽग्निमरुत्परं विलिखितं ताम्बूलपत्रोदरे ।
लेखिन्यान्यमृताक्षकंटकभुवार्कक्षीरराजीप्लुतं
तप्तं दीपशिखाग्निना त्रिदिवसे रम्भामपीहानयेत् ॥३५॥
रेफद्वयेन सहितं लिख मान्तयुग्मं षष्ठस्वरस्वरचतुर्दशबिन्दुयुक्तम् ।
बाह्ये त्रिवह्निपुरमालिख चैतदन्तः पाशत्रिमूर्त्तिगजवश्यकरैश्च वेष्ट्यम्
॥३६॥

पुरं हिरण्यरेतसो विलिख्य तद्बहिः पुनः ।
करोतु मन्त्रवेष्टनं ततोऽग्निवायुमण्डलम् ॥३७॥

तद्यथा -

ॐ आँ ह्रीं क्रौं म्ल्व्र्यूं जम्भे ! मोहे ! ररर घे घे सर्वाङ्गं
दह दह देवदत्ताया हृदयं मम वश्यमानय ह्रीं यं वौषट् ॥
तं ताम्बूलरसेन हेमगरलब्रह्मादिभिः संयुजा ।
प्रेतावासनकर्परैः प्रविलिखेत् ताम्रस्य पत्रेऽथवा ।
अङ्गारैः खदिरोद्भवैः प्रतिदिनं सन्ध्यासु सन्तापयेत्
सप्ताहात् वनितां मनोऽभिलषितां मन्त्री हठादानयेत् ॥३८॥
संलिख्याष्टदलाब्जमध्यगगनं कामाधिपेनावृतं
तत्पत्रेषु तदक्षरं प्रविलिखेद् पत्राग्रतोऽग्न्यक्षरम् ।
ब्लें पत्रान्तरपूरितं वलयितं मन्त्रेण वामादिना
द्रां द्रीं ब्लूं स्मरबीजहोमसहिते नैतज्जगत्क्षोभणम् ॥३९॥
जाप्यः सहस्रदशकं सुभगायोन्यामलक्तकं धृत्वा ।
विद्या नवाक्षरीया तयापसव्येन हस्तेन ॥४०॥
ॐ ह्रीं आँ क्रौं ह्रीं क्ष्रीं ह्रीं क्लीं ब्लूँ द्रां द्रीं
ॐ कामिनी रञ्जय होममन्त्रं यस्या लिखेच्चात्मकरेऽपसव्ये ।
सन्दर्शयेत् सा स्मरबाणभिन्नाद्भुतं भवत्यत्र किमस्ति चित्रम् ॥४१॥
विनयं चले चलचित्ते रतौ मुञ्चयुग्मं होमम् ।
द्रावयत्यबलां बलाल्लक्षेणैकेन जाप्येन ॥४२॥
सिन्दूरसन्निभं पिण्डवलक्षरनिर्मितम् ।
ध्यातं सबिन्दुकं योन्या द्रावयत्यबलां बलात् ॥४३॥
सम्पिष्टोतप्तिकामूलं जलशौचं स्वरेतसा ।
भर्तुर्ददाति या षण्ढं साऽन्यां प्रतिकरोति तम् ॥४४॥
मर्दयेत् पिप्पलाकामं सूतकेन कुरुण्टिका ।
क्षीरेण मधुना सार्धं लिङ्गलेपोऽबलास्मरः ॥४५॥
मधुकर्पूरसौभाग्यं पिप्पिलीकामसंयुतम् ।
द्रावयत्यङ्गनादर्पं लिङ्गलेपनमात्रतः ॥४६॥
एरण्डतैलं फणिकृत्तियुक्तं सन्मातुलिङ्गस्य च बीजमिश्रम् ।
धूपं च दद्याद्रतिहर्म्यमध्ये स्त्रीमोहनं ज्ञानविदो वदन्ति ॥४७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org




Jain Education International For Private & Personal Use Only www.jainelibrary.org





**હૃદયાનંદકારી**
**મા સરસ્વતી દેવીઓ**



**એક હાથે વીણા સોહે છે,**
**બીજે પુસ્તક પડિબોહે છે,**
**કમલાકર માલા મોહે છે,**
**મા ભગવતી...**







Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लीँ कारुद्धं लिख कूटपिण्डं नामान्वितं द्वादशपत्रपद्मम्।
ब्रह्मादिहोमान्तपदेन युक्ताः पूर्वादिपत्रेषु जयादिदेव्यः ॥४८॥
ॐ जये स्वाहा। ॐ विजये स्वाहा।
ॐ अजिते स्वाहा। अपराजिते स्वाहा।
जभमहपिण्डसमेता जम्माद्याः प्रणवपूर्वहोमान्ताः।
विदिग्दलेषु योज्याः स्मरबीजं शेषपत्रेषु ॥४९॥

ॐ ज्म्ल्वर्यूं जम्भे! स्वाहा! ॐ भ्म्ल्वर्यूं मोहे! स्वाहा! ॐ म्म्ल्वर्यूं स्तम्भे! स्वाहा। ॐ ह्म्ल्वर्यूं स्तम्भिनी स्वाहा। शेषपत्रेषु क्लीँ।

त्रिधा मायया वेष्टितं क्रोंनिरुद्धं लिखेद् रोचनाकुङ्कुमैर्भूर्यपत्रे।
मधुस्थापितं वेष्टितं रक्तसूत्रैर्वशं याति रम्भापि सप्ताहमध्ये ॥५०॥

**क्लीँरञ्जिका।१।**

यन्त्रं तदेव विलिखेद् वनिताकपाले गोरोचनादिभिरनंगपदे त्रिमूर्त्तिम्।
सन्ध्यासु सप्तदिवसंखदिराग्नितत्पांदेवाङ्गनामपिसमानयतीहनाकात्
॥५१॥

**हीँरञ्जिका॥२॥**

स्थाने त्रिमूतेर्लिख विश्वबीजं कस्तूरिकाद्यैर्वरभूर्जपत्रे।
बाह्ये वृतं रुपपतङ्गवेष्ट्यं सीमन्तिनीनां विदधाति मोहाम् ॥५२॥

**ईरञ्जिका॥३॥**

विष्णोः पदे समभियोजय रोषबीजं मानुष्यचर्मणि विषेण सलोहितेन।
कुण्डे प्रपूर्य खदिरज्वलनेन तप्तं शत्रोरकालमरणं कुरुतेऽविकल्पात्
॥५३॥

**हूंरञ्जिका॥४॥**

भूर्जेऽरूणेन सविषेण मकारबीजं हूं स्थानके लिख मलीमलमूत्रे-वेष्ट्यम्।
मृत्पात्रिकोदरगतं निहितं श्मशाने दुष्टस्य निग्रहमिदं विदधाति यन्त्रम्
॥५४॥

**मः यन्त्रं बिभीतफलके विषलोहिताभ्यां, मः।॥५॥**

मास्थानकेऽग्निमरुतोः प्रविलिख्य बीजम्।
संवेष्ट्य वाजिमहिषोद्भवकेशपाशैः,
**प्रेतालयस्थमचिरेण करोति वैरम् ॥५५॥ यः ६**

अनलपवनबीजेवायुबीजंससृष्टिं, चितिजगरकाका मेध्ययुक्तैर्वि-लैख्यम्।
गगनगमनपक्षेणोद्यखण्डोध्वजानांपवनहतमरात्युच्चाटनं तद्विद-ध्यात् ॥५६॥ **यः ७**
स्वल्पेनमानुषभुवानृकपालयुग्मे पूर्वोदिताक्षरपदे विलिखेत् खबीजम्।
क्ष्वेडारुणेन मृतकालयभस्मपूर्णे प्रोच्चाटयेदरिकुलं निहितं श्मशाने
॥५७॥ **ह ८**

प्रेताम्बरे व्योमपदे विलेख्यं फडक्षरं निम्बनृपार्कक्षीरैः।
सिद्धालये तन्निखनेत् क्षिपायां बम्भ्रम्यते काक इवारिरुर्व्याम्
॥५८॥ **फट् ९**

कूटं फडक्षरपदे लिखे त्कुङ्कुमाद्यैर्भूर्ये वषट्पदयुतं मठितं त्रिलोहैः।
पुंसांस्वबाहुकटिकेशगलेधृतानांसौभाग्यकृद् युवतिभूपतिवश्यकारि
॥५९॥ **क्ष वषट्।१०।**

क्षस्थानकेऽथलिखितंहरितालकाद्यैरिन्द्रं शिलातलपुटं क्षितिमण्डलस्थलम्।
सूत्रेण तत् परिवृतं विधृतं धरायां कुर्यात् प्रसूतिमुखदिव्यगतेर्निरोधम्
॥६०॥

**लं ११ रञ्जिका द्वादशयन्त्रोद्धारः॥**

अजपुटं लिखेन्नाम ग्लौँ क्षं पूर्णेन्दुवेष्टितम्।
वज्राष्टकपरिच्छिन्नमग्रान्तब्राह्मणाक्षरम् ॥६१॥
तद्बाह्ये भूपुरं लेख्यं शिलायां तालकादिना।
कोषादिस्तम्मनं कुर्यात् पीतपुष्पैः सुपूजितम् ॥६२॥
ॐ ग्लौँ क्षं ठं लं स्वाहा।
संलिख्य नामाष्टदलाब्जमध्ये मायावृतं षोडशसत्कलाभिः।
क्लीँ ब्लूं तथा द्रामथ योजयित्वा दिक्स्थेषु पत्रेषु सदा क्रमेण ॥६३॥
होमं लिखेदङ्कुशबीजमुच्चैः किञ्चान्यपत्रेषु बहिस्त्रिमूर्त्तिः।
भूर्जे हिमाद्यैर्विधृतं स्वकण्ठे सौभाग्यवृद्धिं कुरुतेऽङ्गनानाम्॥६४॥
क्षजभमहरेफपिण्डैः पाशाङ्कुशबाणरञ्जिकायुक्तैः। सौभाग्यरक्षा
प्रणवाद्यैः कुरु मन्त्रिन्। षट् कर्माण्युदयमवगम्य ॥६५॥
ॐक्ष्म्ल्व्यूँ ज्म्ल्वर्यूं भ्म्ल्व्यूँ म्म्ल्व्यूँ ह्म्ल्व्यूँ झ्म्ल्व्यूँ
आँ क्रों ह्रीं क्लीँ ब्लूँ
द्रीं द्रीं संवौषट् त्रिभुवन सारः। सहस्र १२ जपः। दशांशेन होमः॥
वश्यविद्वेषणोच्चाटे पूर्वमध्यापराह्णके।
सन्ध्यार्धरात्रराज्यन्ते मारणे शान्तिपौष्टिके ॥६६॥
वषड् वश्ये फडुच्चाटे हुं द्वेषे पौष्टिके स्वधा।
संवौषडाकर्षणे स्वाहा शान्तिकेऽप्यथ मारणे ॥६७॥
पीतारुणासितैः पुष्पैः स्तम्भनाकृष्टिमारणे।
शान्तिपौष्टि कयोः श्वेतै र्जपेन्मन्त्रं प्रयत्नतः ॥६८॥
कुर्याद् हस्तेन वामेन वश्याकर्षणमोहनम्।
शेषकर्माणि होमं च दक्षिणेन विचक्षणः ॥६९॥
उदधीन्द्रमारुतान्तक नैर्ऋतकुबेरदिक्षु कृतवदनः।
शान्तिकरोधोच्चाटन मारणसम्पुष्टिजनवश्यः ॥७०॥
शान्तिपुष्टौ भवेद्धोमो दूर्वाश्रीखण्डतण्डुलैः।
महिषाक्षरङकाम्भोजैः पुरक्षोभो निगद्यते ॥७१॥
करवीरारुणैः पुष्पैरङ्गना क्षोभमुत्तमम्।
होमैः क्रमुकपत्राणां राजवश्यं विधीयते ॥७२॥
गृहधूपनिम्बपत्रै र्द्विजपक्षैर्लवणराजिकायुक्तैः।
हुतैस्त्रिसन्ध्यविहितै र्विद्वेषो भवति मनुजानाम् ॥७३॥
प्रेतालयास्थिखण्डैर्बिभीतकाङ्गारसमधूमयुतैः।
सप्ताहविहितहोमैररातिमरणं बुधै र्दृष्टम् ॥७४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैवेद्यदीपादिभिरिन्द्रसङ्खयैः सुवर्णपादावभिपूज्य देव्याः।
स्ववामदेशस्थितसव्यहस्तो मन्त्री प्रदद्यात् सहिरण्यमम्भः ॥७५॥
विद्या मयेयं भवते प्रदत्ता त्वया न देयान्यदृशे जनानां।
तच् श्रावयित्वा गुरुदेवतानामग्रेषु विद्यां विधिना प्रदेया ॥७६॥
आज्ञाक्रमः
कृतिना मल्लिषेणेन जिनसेनस्य सूनुना।
रचितो भारतीकल्पः शिष्टलोकमनोहरः ॥७७॥
सूर्याचन्द्रमसौ यावन्मेदिनीभूधरार्णवाः।
तावत् सरस्वतीकल्पः स्थेयाच्चेतसि धीमताम् ॥७८॥
इति श्रीमल्लिषेणाचार्यकृत श्री सरस्वतीमन्त्रकल्पः ॥
श्रीमल्लिषेणसारस्वतविधिरयम् -
प्रथमः कृतस्नानः समौनः प्रातः श्रीभारत्याः पूजांकृत्वा विहितार्क-क्षारोदनः ततोऽनन्तरं सन्ध्यासमये पुनः स्नात्वा सर्वव्यापारवर्जितो भूत्वा शुचिः श्वेतं वस्तु ध्यायेत्।

ॐ ह्रीं भूरिसी भूतधात्री भूमिशुद्धिं कुरु कुरु स्वाहा।

भूमिशुद्धिमन्त्रः।

ॐ ह्रीं वां नमो अरिहंताणं अशुचिः शुचीर्भवामि स्वाहा।

आत्मशुद्धिमन्त्रः ॥

ॐ ह्रीं वद वद वाग्वादिनी ह्राँ हृदयाय नमः। ह्रीं शिरसे नमः ॥
ह्रूँ शिखायै नमः। ह्रौं कवचाय नमः। ह्रः अस्त्राय नमः।
इति सकलीकरणं विधातव्यम्।
ततोऽमृतमन्त्रेण सरस्वत्याः पूजा क्रियते।

ॐ अमृते! अमृतोद्भवे! अमृतवर्षिणि! अमृतवाहिनी! अमृतं स्रावय स्रावय सं सं (ऐं ऐं) क्लीँ क्लीँ ब्लूं (ब्लूं) द्रां द्रीं द्रावय द्रावय स्वाहा।
अथ मण्डलस्थापना विधीयते -
ॐ ह्रीं महापद्मयशसे योगपीठाय नमः
पीठस्थापनमन्त्रः ॥
ॐ ह्रीं अमले! विमले! सर्वज्ञे! विभावरि! वागीश्वरि! कलम्बपुष्पिणि स्वाहा।

प्रतिष्ठामन्त्रः

ततो मण्डलपूजा विधीयते। ॐ सरस्वत्यै नमः। पूजामन्त्रः। मण्डलाग्रेऽग्निकुण्डं समचतुरस्रं विधीयते अङ्गुल १६ प्रमाणम्। ततो मूलमन्त्रेण जाप १२०००। ततो दशांशेन होमः। गुग्गल-मधु-धृत-पुष्पसहितगुटिका चनकप्रमाणा १२००० होमः पिप्पलपलाशशमीसमिधैः। मूलमन्त्रेण करजापलक्ष १०००००। ततः सिद्धिः।

इति मल्लिषेणाचार्यकृत-सरस्वती-मन्त्रकल्पः सम्पूर्णः।

## अज्ञातकर्तृक-
## श्री श्रुतदेवता-मन्त्रगर्भितस्तोत्रम्।

ने. वि. क. ज्ञा. भं. सूरत प्रत नं. ३७१८ तथा ३७२

ॐ ह्रीं गुरुभ्योनमः ॥ ॐ ह्रीं शारदायै नमः ॥

ॐ ह्रीं नमो अरिहंताणं। ॐ ह्रीं नमो सिद्धाणं। ॐ ह्रीं नमो आयरियाणं। ॐ ह्रीं नमो उवज्झायाणं। ॐ ह्रीं नमो लोए सव्वसाहूणं। एसो पंच नमुक्कारो। सव्व पावप्पणासणो। मंगलाणं च सव्वेसिं। पढमं हवइ मंगलं ॥१॥

श्री वर्द्धमानमानम्य नत्वा गुरु पदाम्बुजे।
श्रीँ कल्पकामदुग्धा (वै) फलैः भास्वरमांमंजरी ॥१॥

एकाक्षरी महाविद्या द्वयक्षरी चाधनाशिनी।
त्र्यक्षरी सर्वदा श्रेष्ठा चतुर्वर्ण भयंहरी ॥२॥

ॐ वर्धमान विघ्नहर्ता ह्रीं ऋद्धिवृद्धिकरी।
श्रीं सुखदायी त्रिसन्ध्यं हरीयं (ह्रीं) ह्रौं दुःखनाशिनी ॥३॥

मां मतिनिर्मलकर्त्ता श्रुतं शारददायिनी।
अवधित्यं भवालोक्यं मनः पर्यवज्ञापनी ॥४॥

केवलं केवलालोके ज्ञातं चोदरजात्मके।
ईदं शाक्तिमहं बोधः कथं मम न पूर्णशी ॥५॥

ऐं क्लीं ह्रीं श्रुतदेवतायै मम सर्व सिद्धिं दापय २ स्वाहा ॥ ॐ क्लीं ह्रीं श्रीं श्रुतदेवतायै त्रिलोक दीपकाय भास्करतेजा मिथ्यातिमिरखंडनाय २ स्वाहा ॥ ॐ क्रों क्लीं श्री श्रुतदेवतायै भगरते ॐ ह्रीं सोमाय ॐ ह्रीं यमाय ॐ ह्रीं वरुणाय ॐ ह्रीं कुबेराय ॐ ह्रीं दिग्पालाय, ॐ ह्रीं उर्ध्वलोकाय ॐ ह्रीं अधोलोकाय ॐ ह्रीं तिर्यग्लोकाय ॐ ह्रीं समस्त सुरवर्गाय ॐ ह्रीं कोटानकोटी देवदेवीगणाय श्री श्रुतदेवी पादांबुज सेवनाय २ स्वाहा।

ॐ क्षां क्षीं क्षूं श्री श्रुतदेवता कामेश्वरी सकलदुरित महाभयहरं ह्राँ ह ज क्ष ह्रीं फुट् फुट् स्वाहा। ॐ नमो श्रुतदेवी या भगवई धवलगात्राय सुरासुरकोटाकोट्यादिसहिताय सर्वलोक-आनंदकारणीभगवती सर्वसिद्धि विद्याबुधायणी सर्वज्ञी सर्वविद्या मंत्रयंत्रमुद्रास्फोटनाकराली सर्वोपद्रवयोगचूर्णमथनी सर्वविष-प्रमर्दिनी देवीभगवतीअजितायाः स्वकृतं विद्या मंत्र तंत्र जोग चूर्ण रक्षणा जंभापरसेनामर्दनी नमो भगवई आनंदी सर्वरोगनाशिनी सकलसंघआनंदकारिणीं श्रीश्रुतदेवी भ्रंगी भगवती सर्वसिद्धिविद्या बुधायइणी महामोहिनी त्रिलोकदर्शिनी सर्वक्षुद्रोपद्रवसंहारणी ॐ नमो भगवते सर्वज्ञी सर्वग्रहनिवारणी फुट् २ कंप २ शीघ्रं २ चालय २ बाहुं चालय २ गात्रं चालय २ पादं चालय २ सर्वांगं चालय २ लोलय २ धनु २ कंपय २ कंपावय २ सर्वदुष्टविनाशाय सर्वरोगविनाशाय, जये विजये अजिते अपराजिते जंभे मोहे अजिते ह्रीं २ फुट् २ स्वाहा।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरस्पुर शांतीता जयादेवी श्रीभगवती श्रुतदेवता ॐ जिनमुख निवासिनी जिनेश्वरी ब्रह्माणि ब्रह्मवादिनी भारती सरस्वती ईश्वरी महेश्वरी हंसेश्वरी हंसवाहिनी हंसगामिनी हंसवरणी धवलगात्री कमलमुखी कमलवाहिनी अन्नपूर्णा सर्वईतोपद्रव दुर्भिक्षदु: कालमारी मरकीचूरणी भगवती श्री श्रुतदेवता श्रमणसंघ शांतिकरा भवंती तुष्टिकरी भ. पुष्टिकरा भ. ॐ ऋद्धिकरी भ. ह्रीं सिद्धिकरा भ. श्रीं वृद्धिकरा भ. ॐ ह्रीं श्रीं क्लीं ऐं ऋद्धि-वृद्धि-बुद्धि-सिद्धि-लक्ष्मीकरा भवंती अक्षीणहिरण्यसौवर्णधनधान्य कोश कोष्ठागारा-संपन्नच्च भवेयुमणिमुक्तवज्रवैडूर्य-शंखशिल प्रवालजातिरूपरजत: समृद्धा च सर्वे श्रमणसंघ भवेंउ तथागतमर्हद्-सम्यक्त्वसंबंधी केचित् स्वसचे (समये) भगवान् वाग् वाक्यं सत्यं अन्यं मिथ्याधर्मप्रीतिनो करोति तदुक्तं, जंबुद्वीपे दक्षिणार्धभरते राजगृहे प्रोनग राज्यं संवरो नाम नामाभ्यां महत्वदरिद्रोदु:खे दीननिर्गतानी पुण्यजोगेन तत्प्रिया पुत्री प्रसूतानि तेन बालमात्रेण पूर्वभवकृतगुरुदत्तअक्षयनिधितप: कृतप्रभावेन यत्र यत्र पादं धरती तत्र तत्र हिरण्यसौवर्णप्रगटी-भवमहत्वऋद्धिवांनो जाताएते वस्तुत्वादन्येऽपि भव्यजीवा: सम्यक्त्वदृष्टिश्रावणादमासे ४ चतुर्थीतिथौ अक्षयनिधितप आराधितानी तेनेन सुदरीवत् अक्षयसुखजान् प्रगटितानि जातानि श्रीकल्पमंजरी श्रुतदेवताभगवती मनोवांछित प्रपूरितानि ॐ ह्रीं श्रीं क्लीं ऐं श्री श्रुतदेवता भगवती महालक्ष्मी आया (आँ) नमो नमो मम श्रमणसंध मनवांछित (तं) पूरय २ स्वाहा।

ॐ ह्रीं अर्हं हंसवाहनी ते असिआउसा नमो नमः भगवती वाहीजलजलणतकरहरीकरी चोरारी अहिविषादिभयं हरो हरो स्वाहा ॐ स्वयमेवागत्य धनधान्यहिरण्यसौवर्णरत्नवृष्टि पातयिष्यंति ते प्रीता श्रुतदेवी शासनप्रीता बुधप्रप्ता प्रीताधर्मप्राज्ञप्ता प्रीता मम धर्म भाणकस्य शयने नमो सर्वज्ञी रत्नत्रये ॐ नमो भगवते वज्रधरसागसूरी निर्घोषणाय तथागताय ॐ विश्वओधारे स्वाहा ॐ विश्व ओधारणी स्वाहा हृदयं ॐ लक्ष्मीये (लक्ष्मयै) स्वाहा हृदयं उपदृदयं श्री श्रुतदेवीलक्ष्मीभुतल निवासनीये (निवासिन्यै) स्वाहा सं अ थी द्यं ॐ यानपात्रा वहे स्वाहा ॐ सरस्वते हंसवाहनीये (हिन्यै) स्वाहा अनुत्पन्नानां द्रव्याणामुत्पादनि उत्पन्नानां द्रव्याणां वृद्धिकरी ॐ टीली २ टेल २ इन २ आगच्छागच्छ श्री श्रुतदेवी भगवतीमविलंबं मम श्रमणसंघस्य मनोरथं पूरय दसभ्यो दिग्भ्यो अथोदकधारापरिपुरणतिमही अथातम्मंसि भास्करी-रश्मीनः विध्यायते चिरंतनानि यथा शशी शीता शुनानी पादयोत्योषधी।

इंद्रचैवश्तश्चेव वरणे धन्नदो अथा, मनोनगामनी सिधी चितायनी सदा नृणा ॥१॥ तथैमानी यथाकाम चिततु सतते मम प्रणयंतु प्रसीधंतु सर्व मंत्र पदानिह ॥२॥ सुट २ खट २ खिटी २ खटु २ सरु २ मुच २ मरुच २ तर्पणी २ तर्जनी २ ॐ ह्रीं श्री श्रुतदेवी भगवती मम श्रमणसंघे दीह्नी दापय २ उत्तिष्ठ २ हिरण्यसुवर्णप्रदापय स्वाहा अन्नपानाय स्वाहा वसुनिपातये स्वाहा गौ स्वाहा शुभये स्वाहा वसु स्वाहा वसुदधि पतए स्वाहा ॐ ह्रीं इंद्राय स्वाहा ॐ ह्रीं यमाय स्वाहा ॐ ह्रीं वरुणाय स्वाहा ॐ ह्रीं वैश्रवणाय स्वाहा दिग्भ्यो विदिग्भ्य उत्पादयंतु मे कांक्षां विरह अनुमोदयतु इदं मंत्रपदं ॐ ह्लं ह्रीं एह्येहि श्री श्रुतदेवी भगवती ददये स्वाहा। एतद् भवन्त्या आर्यवसुधारायां हृदयं महापापकारिणेऽपि सिद्धांते परुषपुरुष प्रमाणां च भोगान् ददाति दूषितं च मनोरथ परिपूरयंति सर्वकामादुहान् यान् कामान्कामायति तांस्तानि तान् परिपूरयंति मूलविद्याऽयम्।

ॐ नमो रत्नत्रयाय नमो श्रुतदेवि धनदुहिते ॐ ह्रीं श्रीं वसुधरी वसुधारा पातय २ स्मरु २ धनेश्वरी धनदेहि धनदे रत्नदेहि हेमधन-रत्न-सागर महा निधाने निधानकोटि सतसहे श्रपरिवृति ए अह्ने श्री श्रुतदेवी भगवति प्रविश्य मत्पुरं मत्पूरय २ समणसंघपुरं समणसंघ पूरय २ मद्भवने श्रमणसंघभवने महाधन धान्य धारा पातय २ ॐ हूं त्रटके जिनमुखकैलाश वासनीये स्वाहा महाविद्या।

अर्हते सम्यग्संबुद्धाय ओं श्रीं सुरूपे सुवदने भद्रे सुभद्रे भगवति श्रुतदेवी मंगले भगवति सुमंगलवती अग्रले अग्रवति अले अचले अचपले उद्घातिनि उद्भेदीनि उच्छेदनि उद्योर्तिनि संखवति धनवति धान्यवति उद्योतवति श्रीमति प्रभवति श्रुतदेवि अमले विमले निर्मले रुरुमे सुरुमे भगवति सुरुप विमले अर्च्चनस्ते अतनस्ते विमनस्ते अनुनस्ते अवनतहस्ते विश्वकेशी विश्वनसी विश्वनंस विश्वनंश विश्वरूपिणी विशनषी विश्वसिरि विशुद्धशीले विगूहनीये विरुधनीये उत्तरे अनुत्तरे अकुरे संकुरे नंकुरे प्रभंकुरे रिरीमे रुरुमे खिखिमे खुखुमे विधिमे विधीमे धुधुमे ततरे ततरे तुरे तुरे तर तर ततर ततर तारय तारय मां सर्वं सत्त्वं च वज्रे वज्रे वज्रगर्भे वज्रोपमे वज्रणी श्री श्रुतदेवी वज्रावति उके बुक्के दुक्के दक्के धके ढक्के वरके आवर्तनी प्रावर्तनी निवर्तनी निवरखणी प्रवरखणी प्रवर्षणी वर्द्धनी प्रवर्द्धनी निक्षादने वज्रधर सागर निर्घोषं तथागत अनुस्मर २ स्मर २ सर्व तथागत सत्यमनुस्मर २ मम श्रमण संघस्य सत्यमनुस्मर अनीहारी अनिहार अक्षयनिधी तपारूढ्या तप २ रुढ २ पूर २ पूरय २ ॐ ह्रीं श्रीं ऐं क्लीं श्री श्रुतदेवी भगवति वसुधारे मम श्रमणसंघस्य सपरिवारस्य सर्वेस्या (षां) सत्वानां च भर २ भरणी श्री श्रुतदेवी कल्पवल्ली शांतिमति जयमती महामती सुमंगलमती पिंगलमती सुभद्रमती शुभमती चंद्रमती आगच्छागच्छ समयमनुस्मर स्वाहा आधारमनुस्मर स्वाहा आकारमनुस्मर स्वाहा अवर्णमनुस्मरे स्वाहा प्रभावमनुस्मरे स्वाहा स्वभावमनुस्मरे स्वाहा घृतिमनुस्मरे स्वाहा सर्वतथागतानां विनयमनुस्मरे स्वाहा हृदयमनुस्मर स्वाहा उपहृदयमनुस्मरे स्वाहा जयमनुस्मरे स्वाहा विजयमनुस्मरे स्वाहा सर्वसत्त्वविजयमनुस्मरे स्वाहा सर्व तथागतविजयमनुस्मरे स्वाहा। ॐ श्री वसुमुखी स्वाहा। ॐ वसुश्री स्वाहा ॐ वसुश्रिये स्वाहा ॐ वसवै स्वाहा ॐ वसुमनि स्वाहा ॐ वसुमतिश्रिये स्वाहा ॐ वसुधीरे स्वाहा ॐ ह्रीं श्री श्रुतदेवी धरणी धारणी स्वाहा ॐ सगय सौम्ये समयकरी माहासमये स्वाहा ॐ श्रिये स्वाहा ॐ श्रीं करी स्वाहा ॐ धनकरी स्वाहा ॐ धान्यकरी ॐ ह्रीं श्रिये श्री श्रुतदेवी भगवती रत्नवर्षणी स्वाहा...



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ श्रुतदेवी वसुधारी महावृष्टिनिपातनी वसु स्वाहा। मूल हृदय ॐ वसुधारे सर्वार्थ साधने साधये २ उद्धर २ रक्ष २ सर्वानिधियंत्रं त्रउच्च चट द्रटट वटट दंडं स्वाहा। परम हृदय

ॐ नमो श्री श्रुतदेवी भगवत्ये आर्य लोवडिके अथाजिनासं २ रक्षाणी फहस्ते दीवहस्ते धनदे वरदे शुद्ध विशुद्ध शिवंकरी शांतिकरी भयनासनी भयदुषणी सर्वदुष्टान् भंजय २ स्थंभय २ मम श्रमण संघ शांतिपुष्टी कुरु कुरु स्वाहा॥

उपसर्गा क्षयंकारी छेदंती विघ्नवल्लरी।
ददाति सर्वदा सिद्धिं नमोऽस्तु कल्याणकारिणी॥
सर्वमंगलमांगल्यं सर्वकल्याणकारणं।
प्रधानं सर्वधर्माणां जैनं जयति शासनम् ॥१॥

इति मन्त्रगर्भित-श्रुतदेवता-स्तोत्रं सम्पूर्णम्

## सरस्वती महा-स्तोत्रम्।

(प्रस्तुत 'सरस्वती महा-स्तोत्र' का एक वर्ष तक पाठ करने से मूर्ख व्यक्ति की भी मूर्खता दूर हो जाती है। नित्य-पाठ करने से पाठ-कर्त्ता मेधावी हो जाता है। यह महर्षि याज्ञवल्क्य का अनुभूत प्रयोग है - सं०)

कृपां कुरु जगन्मातर्मामेवं हत-तेजसम्।
गुरु-शापात् स्मृति-भ्रष्टं, विद्या-हीनं च दुःखितम् ॥१॥

ज्ञानं देहि स्मृतिं विद्याम्, शक्तिं शिष्य-प्रबोधिनीम्।
ग्रन्थ-कर्तृत्व-शक्तिं च, सु-शिष्यं सु-प्रतिष्ठितम् ॥२॥

प्रतिभां सत्-सभायां च, विचार-क्षमतां शुभाम्।
लुप्तं सर्वं दैव-योगात्, नवी-भूतम् पुनः कुरु ॥३॥

यथांकुरं भस्मनि च, करोति देवता पुनः।
ब्रह्म-स्वरूपा परमा, ज्योति-रूपा सनातनी ॥४॥

सर्व-विद्याधि-देवी या, तस्यै वाण्यै नमो नमः।
विसर्ग-बिन्दु-मात्रासु, यदधिष्ठानमेव च ॥५॥

तदधिष्ठात्री या देवी, तस्यै नीत्यै नमो नमः।
व्याख्या-स्वरूपा सा देवी, व्याख्याऽधिष्ठात्री रूपिणी॥६॥

यया विना प्रसंख्या-वान्, संख्यां कर्तुं न शक्यते।
काल-संख्या-स्वरूपा या, तस्यै देव्यै नमो नमः ॥७॥

भ्रम-सिद्धान्त-रूपा या, तस्यै देव्यै नमो नमः।
स्मृति-शक्ति-ज्ञान-शक्ति-बुद्धि-शक्ति-स्वरूपिणी ॥८॥

प्रतिभा-कल्पना-शक्तिः, या च तस्यै नमो नमः।
सनत्कुमारो ब्रह्माणम्, ज्ञानं पप्रच्छ यत्र वै ॥९॥

बभूव मूक-वत्सोऽपि, सिद्धान्तम् कर्तुमक्षमः।
तदा जगाम भगवान्, आत्मा श्रीकृष्ण ईश्वरः ॥१०॥

उवाच स च तां स्तौहि, वाणीमिष्टां प्रजा-पते!
स च तुष्टाव तां ब्रह्मा, चाज्ञया परमात्मनः ॥११॥

चकार तत्-प्रसादेन, तदा सिद्धान्तमुत्तमम्।
यदाऽप्यनन्तं पप्रच्छ, ज्ञानमेकं वसुन्धरा ॥१२॥

बभूव मूक-वत्सोऽपि, सिद्धान्तम् कर्तुमक्षमः।
तदा तां स च तुष्टाव, सन्त्रस्त कश्यपाज्ञया ॥१३॥

ततश्चकार सिद्धान्तम्, निर्मलं भ्रम-भञ्जनम्।
व्यासः पुराण-सूत्रं च, पप्रच्छ वाल्मीकिं यदा ॥१४॥

मौनी-भूतश्च संस्मार, तामेव जगदम्बिकाम्।
तदा चकार सिद्धान्तम्, तद् वरेण मुनीश्वरः ॥१५॥

सम्प्राप्य निर्मलं ज्ञानं, भ्रमान्ध्य-ध्वंस-दीपकम्।
पुराण-सूत्रं श्रुत्वा च, व्यासः कृष्ण-कुलोद्भवः ॥१६॥

तां शिवां वेददध्यौ च, शत-वर्षं च पुष्करे।
तदा त्वत्तो वरं प्राप्य, सत्कवीन्द्रो बभूव ह ॥१७॥
तदा वेद-विभागं च, पुराणं च चकार सः।
यदा महेन्द्रः पप्रच्छ, तत्व-ज्ञानं सदा-शिवम् ॥१८॥

क्षणं तामेव सञ्चिन्त्य, तस्मै ज्ञानं ददौ विभुः।
पप्रच्छ शब्द-शास्त्रं च, महेन्द्रश्च बृहस्पतिम् ॥१९॥

दिव्यं वर्ष-सहस्त्रं च, स त्वां दध्यौ च पुष्करे।
तदा त्वत्तो वरम् प्राप्य, दिव्य-वर्ष-सहस्रकम् ॥२०॥

उवाच शब्द-शास्त्रं च, तदर्थं च सुरेश्वरम्।
अध्यापिताश्च ये शिष्याः, यैरधीतं मुनीश्वरैः ॥२१॥

ते च तां परि-सञ्चिन्त्य, प्रवर्तन्ते सुरेश्वरीम्।
त्वं संस्तुता पूजिता च, मुनीन्द्रैः मनु-मानवैः ॥२२॥

दैत्येन्द्रैश्च सुरैश्चापि, ब्रह्म-विष्णु-शिवादिभिः।
जडी-भूतः सहस्रास्यः, पञ्च-वक्त्रश्चतुर्मुखः ॥२३॥

यां स्तोतुं किमहं स्तौमि, तामेकास्येन मानवः।
इत्युक्त्वा याज्ञवल्क्यश्च, भक्ति-नम्रात्म-कन्धरः ॥२४॥

प्रणनाम निराहारो, रुरोद च मुहुर्मुहुः।
ज्योति-रूपा महा-माया, तेन दृष्टाऽप्युवाच तम् ॥२५॥

स कवीन्द्रो भवेत्युक्त्वा, वैकुण्ठं च जगाम ह।
याज्ञवल्क्य-कृतम् वाणी, स्तोत्रमेतत् तु यः पठेत् ॥२६॥

स कवीन्द्रो महा-वाग्मी, बृहस्पति-समो भवेत्।
महा-मूर्खश्च दुर्बुद्धिः, वर्षमेकं यदा पठेत् ॥२७॥

स पण्डितश्च मेधावी, सु-कवीन्द्रो भवेद् ध्रुवम् ॥२८॥

(श्रीमद्-देवी-भागवत, अ० ६-५)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्लां ब्रह्म-विचार-सार-परमां आद्यां जगद्-व्यापिनीम्।
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् ।।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थिताम्।
वन्दे तां परमेश्वरीं भगवतीं बुद्धि-प्रदां शारदाम् ।।१।।

या कुन्देन्दु-तुषार-हार-धवला या शुभ्र-वस्त्रावृता,
या वीणा वर-दण्ड-मण्डित-करा या श्वेत-पद्मासना।
या ब्रह्माच्युत-शङ्क-प्रभृतिभि र्देवैः सदा सेविता,
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।२।।

ह्रीं ह्रीं हृद्यैकबीजे शशिरुचि-कमले कल-विसृष्ट-शोभे,
भव्यै भव्यानुकूले कुमति-वन-दवे विश्व-वन्द्यांघ्रि-पद्म।
पद्मे पद्मोपविष्टे प्रणत-जनो मोद सम्पादयित्री,
प्रोत्फुल्ल-ज्ञान-कूटे हरि-निज-दयिते देवि ! संसार-तारे
।।३।।

ऐं ऐं दृष्ट-मन्त्रे कमल-भव-मुखाम्भोज-भूत-स्वरूपे,
रुपारुप-प्रकाशे सकल-गुण-मये निर्गुणे निर्विकारे।
न स्थूले नैव सूक्ष्मेऽप्य विदित-विभवे नापि विज्ञान-तत्त्वे,
विश्वे विश्वान्तराले सुर-वर-नमिते निष्फले नित्य-शुद्धे
।।४।।

નીચેના સ્તોત્રનો પ્રતિ-દિન ત્રણવાર પાઠ કરવો. સરસ્વતીની પૂર્ણ કૃપા મળશે તથા મોક્ષ પ્રાપ્ત થશે.

ॐ रवि-रुद्र-पितामह-विष्णु-नुतं,
हरि चन्दन-कुंकुम-पङ्क-युतम्।
मुनि-वृन्द-मजेन्द्र-समान-युतं
तव नौमि सरस्वति ! पाद-युगम् ।।१।।

शशि-शुद्ध-सुधा-हिम-धाम-युतं,
शरदम्बर-बिम्ब-समान -करम्
बहु-रत्न-मनोहर-कान्ति-युतं,
तव नौमि सरस्वति ! पाद-युगम् ।।२।।

कनकाब्ज-विभूषित-भीति-युतं, भव-भाव-विभावित
भव-भाव-विभावित-भिन्न-पदम्।
प्रभु-चित्त-समाहित-साधु-पदं,
तव नौमि सरस्वति ! पाद-युगम् ।।३।।

मति-हीन-जनाश्रय-पारमिदं,
सकलागम-भाषित-भिन्न-पदम्।
परि-पूरित-विश्वमनेक भवं,
तव नौमि सरस्वति ! पाद-युगम् ।।४।।

सुर-मौलि-मणि-द्युति-शुभ्र-करं,
विषयादि-महा-भय-वर्ण-हरम्।
निज-कान्ति-विलायित-चन्द्र-शिवं,
तव नौमि सरस्वती ! तव पदा-युगम् ।।५।।

भव-सागर-मज्जनभीति नुतं,
प्रति-पादित-सन्तति-कारमिदम्।
विमलादिक-शुद्ध-विशुद्ध-पदं,
तव नौमि सरस्वति ! तव पाद-युगम् ।।६।।

परिपूर्ण-मनोरथ-धाम-निधिं,
परमार्थ-विचार-विवेक-विधिम्।
सुर-योषित-सेवित-पाद-तलं,
तव नौमि सरस्वति ! पाद-युगम् ।।७।।

गुणनैक-कुल-स्थिति-भीति-पदं,
गुण-गौरव-गर्वित-सत्य-पदम्।
कमलोदर-कोमल-पाद-तलं,
तव नौमि सरस्वति ! पाद-युगम् ।।८।।

## ।। फल-श्रुति ।।

इदं स्तोत्रं महा-पुण्यं, ब्रह्मणा परिकीर्तितं।
यः पठेत् प्रातरुत्थाय, तस्य कण्ठे सरस्वती ।।
त्रिसंध्यं यो जपेन्नित्यं, जले वापि स्थले स्थितः।
पाठ-मन्त्रे भवेत् प्राज्ञो, ब्रह्म निष्ठो पुनः पुनः
हृदय-कमल मध्ये, दीप-वद् वेद-सारे,
प्रणव-मयमतर्क्यं, योगिभिः ध्यान-गम्यकम् ।।
हरि-गुरु-शिव-योगं, सर्व भूतस्थमेकम्
सकृदपि मनसा वैध्यायेत यः सः भवेन्मुक्त :
(पं. कृष्णानंदमिश्र, वैद्य ककरा, प्रयाग की कृपासे प्राप्त)

## श्री सरस्वती-विश्वजयं कवचम्।

श्रृणु वत्स ! प्रवक्ष्यामि, कवचं-सर्व-कामदम्।
श्रुति-सारं श्रुति-सुखं, श्रुत्युक्तं श्रुति-पूजितम्।
उक्तं कृष्णेन गो-लोके, मह्यं वृन्दावने वने।
रासेश्वरेण विभुना, रासने रास-मण्डले।
अतीव-गोपनीयं च, कल्पवृक्षसमं परम्।
अश्रुताऽद्भूत-मन्त्राणां, समुहैश्च समन्वितम्।
यद्धृत्वा पठनाद् ब्रह्मन् ! बुद्धिमांश्च बृहस्पतिः।
यद्धृत्वा भगवाञ्छुक्रः, सर्वदैत्येषु पूजितः।
पठनाद् धारणाद् वाग्मी, कवीन्द्रो वाल्मिको मुनिः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वायम्भुवो मनुश्चैव, यद्धृत्वा सर्वपूजितः
कणादो गौतमः कण्वः, पाणिनिः शाकटायनः।
ग्रन्थं चकार यद्धृत्वा, दक्षः कात्यायनः स्वयं।
धृत्वा वेद-विभागं च, पुराणान्यखिलानी च।
चकार लीला-मात्रेण कृष्ण-द्वैपायनः स्वयम्।
शातातपश्च सम्वर्त्तो, वसिष्ठश्च पराशरः।
यद्धृत्वा पठनाद् ग्रन्थं, याज्ञवल्क्यश्चकार सः।
ऋष्य-श्रृङ्गो भरद्वाजश्चाऽऽस्तीको देवलस्तथा।
जैगीषव्योऽथ जाबालि र्यद् धृत्वा सर्वपूजितः।
कवचस्याऽस्य विप्रेन्द्र! ऋषिरेव प्रजा-पतिः।
स्वयं बृहस्पतिश्छन्दो, देवो रासेश्वरः प्रभुः।
सर्व-तत्त्व-परिज्ञात-सर्वार्थ-साधनेषु च।
कवितासु च सर्वासु, विनियोगः प्रकीर्तितः।

## ॥ मूल पाठ ॥

ॐ ऐं सरस्वत्यै स्वाहा, शिरो मे पातु सर्वतः,
ॐ ऐं वाग्देवतायै स्वाहा, भालं मे सर्वदाऽवतु।
ॐ ऐं सरस्वत्यै स्वाहा, श्रोत्रं पातु निरन्तरम्,
ॐ ह्रीं भारत्यै स्वाहेति, नेत्रयुग्मं सदाऽवतु।
ऐं ह्रीं वाग्वादिन्यै स्वाहा, नासा मे सर्वतोऽवतु,
ह्रीं विद्याऽधिष्ठातृदेव्यै, स्वाहा ओष्ठं सदाऽवतु।
ॐ श्रीं ह्रीं ब्राह्म्यै स्वाहेति, दन्त-पङ्क्तीं सदाऽवतु।
ऐमित्येकाक्षरी मन्त्रो, मम कण्ठं सदाऽवतु।
ॐ श्रीं ह्रीं पातु मे ग्रीवा, स्कन्धं मे श्रीं सदाऽवतु,
श्रीं विद्याऽधिष्ठातृदेव्यै, स्वाहा वक्षः सदाऽवतु।
ॐ विद्या-स्वरूपायै च, स्वाहा मे पातु नाभिकाम्,
ॐ ह्रीं ह्रीं वाण्यै स्वाहेति, मम पृष्ठं सदाऽवतु:
ॐ सर्व-वर्णात्मिकायै, पद्म-युग्मं सदाऽवतु,
ॐ रागाधिष्ठातृदेव्यै, सर्वाङ्गं मे सदाऽवतु।
ॐ सर्व-कण्ठ-वासिन्यै, स्वाहा प्राच्यां सदाऽवतु।
ॐ ह्रीं जिह्वाग्रवासिन्यै, स्वाहाऽग्नि दिशि रक्षतु।
ॐ ऐं ह्रीं श्रीं क्लीं सरस्वत्यै बुध-जनन्यै स्वाहा,
सततं मन्त्र-राजोऽयं, दक्षिणे मां सदाऽवतु।
कवि-जिह्वाग्र-वासिन्यै, स्वाहा मां वारुणेऽवतु,
ॐ सदाऽम्बिकायै स्वाहा, वायव्ये मां सदाऽवतु।
ॐ गद्य-पद्य-वासिन्यै, स्वाहा मामुत्तरेऽवतु,
ॐ सर्व-शास्त्र-वासिन्यै, स्वाहेशान्यां सदाऽवतु।
ॐ ह्रीं सर्व-पूजितायै, स्वाहा चोर्ध्वं सदाऽवतु,
ऐं ह्रीं पुस्तक-वासिन्यै, स्वाहाऽधो मां सदाऽवतु।
ग्रन्थ-बीज-स्वरूपायै, स्वाहा मां सर्वतोऽवतु॥

## ॥ फल-श्रुति ॥

इति ते कथितं विप्र! सर्व-मन्त्रोघ-विग्रहम्।
इयं विश्व-जयं नाम, कवचं ब्रह्म-रूपिणम्।
पुरा श्रुतं धर्म-वक्त्रात्, पर्वते गन्ध-मादने।
तव स्नेहात् मयाऽऽख्यातं, प्रवक्तव्यं न कस्यचित्।
गुरूमभ्यर्च्य विधि-वद्, वस्त्रालङ्कार-चन्दनैः।
प्रणम्य दण्ड-वद् भूमी, कवचं धारयेत् सुधीः।
पञ्च-लक्ष्य-जपेनैव, सिद्ध तु कवचं भवेत्।
यदि स्यात् सिद्ध-कवचो, बृहस्पति-समो भवेत्।
शक्नोति सर्वं जेतुं सः, कवचस्य प्रसादतः।
इति ते काण्व-शाखोक्तं, कथित कवचं मुने!॥

॥ श्री ब्रह्म-वैवर्त-महा-पुराणे नारायण-नारद-सम्वादे सरस्वती विश्व-जयं कवचं॥

हुं सिद्ध सारस्पत नामना उत्तम स्तोत्रने कहुं छुं-
उमा च भारती भद्रा, वाणी च विजया जया।
वाणी सर्व-गता गौरी, कामाक्षी कमल-प्रिया॥
सरस्वती च कमला, मातङ्गी चेतना शिवा।
क्षेमङ्करी शिवानन्दी, कुण्डली वैष्णवी तथा॥
ऐन्द्री मधु-मती लक्ष्मीर्गिरिजा शाम्भवाम्बिका।
तारा पद्मावती हंसा, पद्म-वासा मनोन्मनी॥
अपर्णा ललिता देवी, कौमारी कबरी तथा।
शाम्भवी सुमुखी नेत्री, त्रिनेत्री विश्व-रूपिणी।
आर्या मृडानी ह्रींकारी साधनी सुमनश्च हि।
सूक्ष्मा पराऽपरा कार्त-स्वर-पती हरि-प्रिया॥
ज्वाला मालिनिका चर्चा, कन्या च कमलासना।
महा-लक्ष्मी र्महा-सिद्धिः स्वधा स्वाहा सुधामयी॥
त्रिलोक-पाविनी भर्त्री, त्रिसन्ध्या त्रिपुरा त्रयी।
त्रिशक्तिस्त्रिपुरा दुर्गा, ब्राह्मी त्रैलोक्य मोहिनी॥
त्रिपुष्करा त्रिवर्गदा, त्रिवर्णा त्रिस्वधा-मयी।
त्रिगुणा निर्गुणा नित्या, निर्विकारा निरञ्जना॥
कामाक्षी कामिनी कान्ता, कामदा कलहंसगा।
सहजा कालजा प्रज्ञा, रमा मङ्गल-सुन्दरी॥
वाग्-विलासा विशालाक्षी, सर्व विद्या सुमङ्गला।
काली महेश्वरी चैव, भैरवी भुवनेश्वरी॥
वाग्-बीजा च ब्रह्मात्मजा, शारदा कृष्ण-पूजिता।
जगन्माता पार्वती च, वाराही ब्रह्म रूपिणी।
कामाख्या ब्रह्म-चारिणी, वामदेवी वरदाम्बिका॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ..... स्तुतयः .....

कुंदिंदुगोक्खीर-तुसारवन्ना, सरोजहत्थाकमले निसन्ना।
वाएसिरि पुत्थय वग्गहत्था सुहाय सा अम्ह सया पसत्था ॥१॥

सन्निज्झं मज्झ सया विमलंगोवंग गुण महग्धविया।
तिजयपियामहमुहकमलवासिणी कुणउ सुयदेवी ॥२॥

गम्भीरपसन्नपयप्पवाहिणिं विबुहजणमणाणंदं।
कविकुलगिरिस्स वंदे सरस्सहं इंद भूइस्स ॥३॥

जीए अणुग्गिहीया सुयसागर पारगामिणो हुंति।
मुणिणो मणप्पसायं सा अम्हं कुणउ सुयदेवी ॥४॥

कुंदेंदुज्ज्वलवन्ना जिणिंदवयणारविंदसंभूया।
वसउ वयणे इयाणिं अम्हाण सरस्सई देवी ॥५॥

जा विमलदंसणधरा सुदंसणा दंसणिज्जवरदेहा।
सा अम्हसमीहियकज्ज साहणे हणउ दुरियाइं ॥६॥

हंसाधिरूढा वरदाणधन्ना वाएसिरिनाण गुणोववन्ना।
निच्चंपि अम्हं हवउप्पसन्ना कुंदिंदु गोक्खीर तुसारवन्ना ॥७॥

पणमह पणमंतमहाकइंद संकतनयण पडिबिंब।
कयनीलुप्पलपूयं व भारई चरणनहनिवहं ॥८॥

भद्दं सरस्सईए सत्तस्सरणोसवयणवसहीए।
जीयगुणेहिं कविवरा मया वि नामेण जीवंति ॥९॥

वंदित्तु चेइए सम्मं छट्ठभत्तेण परिजवे।
इमं सुय देवयं विज्जं लक्खहा चेइयालइ ॥१०॥

सव्वसूयसमूहमती वामकरे गहिय पोत्थया देवी।
जक्खकुहंडी सहिया देंतु अविग्घं मम नाणं ॥११॥

कम्मसुसंठियाचलणा, अमलिये कोरंटवेट संकासा।
सुयदेवया भगवई मम मतितिमिरं पणासे ॥१२॥

वियसिय अरविंदकरा नासिय तिमिरा सुयाहिया देवी।
मज्झंपि देउ मेहं बुहविबुहमंसिया णिच्चम् ॥१३॥

वद वदति न वाग्वादिनि भगवति कः श्रुतसरस्वती गमेच्छुः।
रङ्गतरङ्गमतिवर तरणिस्तुभ्यं नम इतीह
॥१४॥

प्रसादपोतं समवाप्य यस्या, स्तरन्ति सन्तोऽखिलवाङ्मयाब्दिम्।
जाड्यान्धकारव्रजसूर्यरूपां, सा शारदा मे वरदा सदाऽस्तु ॥१५॥

कनक निर्मलकुण्डलधारिणी, कनकगर्भभावा भुवनेश्वरी।
सुकविकामितपूरण तत्परा, जनयति प्रकटं सुखसञ्चयम् ॥१६॥

जगत्त्रयाधीशमुखोद्भवा या वाग्देवतायाः स्मरणं विधाय।
विभाव्यतेऽसौ स्व परोपकृत्यै विशुद्धिहेतुः शुचिरात्मबोधः ॥१७॥

हंसाऽम्बुजे निविष्टा वाग्बीजेऽयान्तरात्म हंसे वा।
ब्राह्मीव पुण्डरीकं सरस्वती गौतमं नमति॥ मंत्रराजरहस्यम् ॥१८॥

सरस्वतीसदा भूयादार्हती शाश्वती श्रिये।
पूर्णा प्रभातसञ्जात प्रभवेन्दुविवस्वतोः ॥१९॥

सरस्वती मया दृष्टा वीणा पुस्तकधारिणी।
हंसवाहनसंयुक्ता विद्यादानं वरप्रदा ॥२०॥

जयन्ति ते सत्कवयो, यदुक्त्या, बालाऽपि स्युः कविताप्रवीणाः।
श्रीखण्डवासेन कृताधिवासाः, श्री खण्डतां यान्त्यपरेऽपि वृक्षाः
॥२१॥

तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे।
यत्प्रसादात् विलीयन्ते मोहान्ध तमसच्छटाः ॥२२॥

यस्याप्रसादाच्छ्रुतसिन्धुपारं यान्तीह मूर्खाश्चभवन्ति दक्षाः।
श्री भारती भागवती प्रसन्ना देयाद्वरं श्रीश्रुतदेवताऽसौ ॥२३॥

वाग्देवि ! संविदेन स्यात् सदा या सर्वदेहिनाम्।
चिन्तितार्थान् पिपर्तीह कल्पवल्लीव सेविता ॥२४॥

श्वेतपद्मासनादेवी श्वेतपुष्पाभिशोभिता।
श्वेतांबरधरा नित्यं श्वेतगंधानुलेपना ॥२५॥

सरस्वत्याः प्रसादेन काव्यं कुर्वन्ति मानवाः।
तस्मात् निश्चलभावेन पूजनीया सरस्वती ॥२६॥

जयन्तु सर्वेऽपि कवीश्वरास्ते, यदीय सत्काव्यसुधाप्रवाहः।
विकूणिताक्षेण सहज्जनेन, निपीयमानोऽप्यति पुष्यतीव ॥२७॥

वाग्देवी शारदा ब्राह्मी भारती गीः सरस्वती।
हंसयाना ब्रह्मपुत्री सा सदा वरदाऽस्तु नः ॥२८॥

निषण्णाकमले भव्या अब्जहस्ता सरस्वती।
सम्यग्ज्ञानप्रदा भूयाद्, भव्यानां भक्तिशालिनाम् ॥२९॥

वितीर्ण शिक्षा इव हृत्पदस्थं, सरस्वतीवाहनराजहंसैः।
ये क्षीर-नीर प्रविभागदक्षा, विवेकिनस्ते कवयो जयन्ति ॥३०॥

साध्यऽक्षा श्रुतदेवी वाऽनुयोगाङ्गा चतुर्भुजा।
आत्मानुशासनाद् ब्राह्मी संविदे हंसगामिनी ॥३१॥

हस्ते शर्मदपुस्तकां विदधती शतपत्रकं चापरं,
लोकानां सुखदं प्रभूतवरदं सज्ज्ञानमुद्रं परम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुभ्यं बालमृणाल-कन्दल लसल्लीलाविलोलंकरं,
प्रख्याता श्रुतदेवता विदधती सौख्यं नृणां सुनृतम् ॥३२॥

श्वेताब्जनिधि चन्द्राश्मप्रासादस्थां चतुर्भुजाम्।
हंसस्कन्धस्थितां चन्द्रमुर्त्यूज्वल तनुप्रभाम् ॥३३॥

श्री जिनेन्द्रमुखाम्भोजविलासं वस ते सदा।
जिनागमसुधाम्भोधि मध्यासिनि विधुद्युते ॥३४॥

मुखेन्दोरंशुभि र्व्याप्तं या बिभर्ति विकस्वरं।
करे पद्ममचिन्त्येन धाम्ना तां नौमि देवताम् ॥३५॥

यस्या भाति करे विकासिकमलं वृन्दैरलिनां वृतं,
यद्युक्तिप्रभवादि-वादि विभवाद् धामत्वमुच्चैर्गतम्।
मादेवी विकचारविन्दविलसत् नेत्रा त्रिलोकैस्स्तुताः,
हस्तन्यस्तपुस्तकाऽस्तु भवतां विध्वस्त मोहासदा ॥३६॥

तमोगण विनाशिनी सकल, कालमुद्योतिनी,
धरातलविहारिणी जडसमाजविद्वेषिणी।
कलानिधि सहायिनी लसदलोलसौदामिनी,
मदन्तरावलम्बिनी भवतु काऽपि कादम्बिनी ॥३७॥

शारदा शारदाम्भोज वदना वदनाम्बुजे।
सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥ ३८॥
वीणापुस्तकभृन्मरालललितं धत्ते च रूपं बहि :
पूजार्हं भुवनत्रयस्य विशदं ज्ञानस्वरूपाऽपि या ॥३९॥

समञ्जुलं वादयती कराभ्यां या कच्छपीं मोहितविश्वविश्वाम्।
शक्तित्रिरूपा त्रिगुणाभिरामा वाणी प्रदेयात् प्रतिभां भजत्सु ॥४०॥

चंद्रप्रभां नीलगलप्रयानां त्रिनेत्ररम्यां स्वगुणप्रतुष्टां।
पद्मासनां त्वां प्रयजेऽक्षमाला सत्पुस्तकाढ्यां च मयूरचारे ॥४१॥

त्वां मुक्तामयसर्वभूषणगणां शुक्लाम्बराडम्बरां,
गौरीं गौरसुधातरङ्धवला मालोक्य हृत्पङ्कजे।
वीणापुस्तकमोक्तिकाक्षवलयश्वेताब्जवलगत्करां,
न स्यात् कः स्फुरवृत्तचक्र-रचनाचातुर्यचिन्तामणि : ॥४२॥

मौक्तिकाक्ष वलयाब्जकच्छपी पुस्तकाङ्कितकरोपशोभिते।
पद्मवासिनि हिमोज्ज्वलाङ्गि वाग्वादिनि नो भवच्छिदे ॥४३॥

एकचक्रा चतुर्हस्ता मुकुटेन विराजिता।
प्रभामण्डलसंयुक्ता कुण्डलान्वितशेखरा॥
अक्षाब्जवीणा पुस्तकं महाविद्या प्रकीर्तिता॥
अथैकदाविश्वविहङ्गवंशोत्तंसेन हंसेन समुह्यमाना।
भासां भरैः सम्भृतशारदाभ्रशुभ्रैः ककुब्भासमदभ्रमन्ती ॥४४॥

स्वर्वारनारीधुतचामराली मिलन्मरालीकुल संकुलश्रीः।
गङ्गेव मूर्त्तानिलनर्तितोर्मि चलानि चेलानि समुद्वहन्ती ॥४५॥

नितान्तमन्त्याक्षरिकानवद्यैः पद्यैश्च गद्यैश्च नवोक्तिहृद्यैः।
अनुक्रमेणोभयपार्श्वगाम्यां संस्तूयगाना शिवकेशवाभ्याम् ॥४६॥

मुरारिनाभिनलिनान्तरालनिलीनमूर्त्तेरलिनिर्विशेषम्।
आकर्णयन्ती श्रुति मुञ्ज कुञ्ज समानि सामानि चतुर्मुखस्य ॥४७॥

शरत्कुहूधिष्ण्यसमूहगौरा मेकत्र हस्ते स्फटिकाक्षमालाम्।
दातुं नतेभ्यः कवितालतायाः सुबीजराजीमिव धारयन्ती ॥४८॥

करे परस्मिन्प्रणतार्त्तलोकदारिद्रय कन्दैकनिषूदनाय।
प्रसह्य बिन्दुकृतपद्मवासानिवाससम्भोरुहमुद्वहन्ती ॥ ४९॥

अन्यत्रपाणौ विकचारविन्द समाय तद्भृङ्गविघट्टनेन।
वीणां रणन्तीं नमतोऽनुवेल निवेदयन्तीमिव धारयन्ती ॥५०॥

विद्यात्रयी सर्वकलाविलास, समग्रसिद्धान्तरहस्यमूर्तेः।
वाग्वीरुधःकन्दमिवेतरस्मिन्हस्ताम्बुजेपुस्तकमादधाना ॥५१॥

सारस्वतध्यानवतोऽस्य योगनिद्रामुपेतास्य मुहूर्त्तमेकम्।
स्वप्नान्तरागत्य जगत्पुनाना श्री शारदा सादरमित्युवाच ॥५२॥

स्मृत्वा मंत्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोर्त्थं,
श्वेतस्निग्धोर्ध्वनालं हृदि च विकचतां प्राप्य निर्यातमास्यात्।
तन्मध्येचोर्ध्वरूपामभयदवरदां पुस्तकाम्भोजपाणिं,
वाग्देवी त्वन्मुखाच्चस्वमुखमनुगतां चिन्तयेदक्षरालिम् ॥५३॥

भैरव पद्मावती कल्प

अब्जासना त्रिनेत्रा बालेन्दुजयकिरीट युक्ता श्वेता। जैन संहिता
सिताम्बरां चतुर्भुजां सरोजविष्टरस्थितां।
सरस्वतीं वरप्रदामहर्निशं नमाम्यहम् ॥५४॥

अभयज्ञान, मुद्राक्षमाला-पुस्तकधारिणी।
त्रिनेत्रा पातु मां वाणी जटाबालेन्दुमण्डिता ॥५५॥

विद्यानुशासनसेक्शन ओन वागीसाससाधन

चंचच्चंद्ररुचं कलापिगमनां यः पुण्डरीकासनां
सज्ज्ञानाभय पुस्तकाक्षवलय प्रावारराज्युज्वलाम्।
त्वामप्येति सरस्वति त्रिनयनां ब्राह्मे मुहूर्त्ते मुदा,
व्याप्ताराधरकीर्तिरस्तु सुमहा विद्यः स वंद्यः सताम् ॥ ५६॥

विद्यानुशासन०

मूलमंत्र ॐ ह्रीं श्रीं वद् वद वाग्वादिनी स्वाहा।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्त्रै ख्यातानुयोगैस्त्रिभिरभिनयनैर्दर्शनज्ञानवृत्तैः
हस्तैः व्याख्याक्षमालामभयफलकलितै राजते या च देवी ।
सेऽयं चंद्रावदाता बिसकुसुमगता श्यामकंठाधिरूढा ।
ब्राह्मी भव्याभिवृद्धिं जनयतु सततं विश्वविज्ञानदानैः ॥५७॥

मंत्र : ॐ ऐं हस्क्लीं व्हस्क्लीं वाग्देव्यै नमः ॥

कंकेल्यङ्कुर कोमलांघ्रिकमलां कर्पूरहारद्युतिं,
पाशाम्भोरुहपुस्तकाभयकरां हंसाधिरुढां सतीम् ।
आहारोभयशास्त्रभेषजमहादानोपदेशान्वितां,
भक्तानां विदुषां सदैव वरदां भाषां भजामो वयम् ॥५८॥

देवी सरस्वती कार्या सर्वाभरणभूषिता ।
चतुर्भुजा सा कर्तव्या तथैव च समुत्थिता ॥५९॥

पुस्तकं चाक्षमाला च तस्या दक्षिण हस्तयोः ।
वामयोश्च तथा कार्या वैणवी च कमण्डलुः ॥६०॥

पीतं स्तम्भादिकार्ये सितमतिसुभगे शान्तिके वाग्विधाने
आकृष्टौ वश्यकामे जपकुसुमविभं.........

उच्चाटे धुम्रवर्णस्फटिकमणि निभं खेचरत्वं ददाति
व्यामोहं मोक्षहेतुं परमपर पांतु नो जैनशक्तिः ॥६१॥

एन्दवज्योतिरानंददा (यि) नी श्रुतदेवता ।
सर्वात्मचेतसि स्वैरं भावान् प्रोद्भावयत्विह ॥६२॥
तत्त्वार्थसूत्रबालावबोध

हंसीव वदनाम्भोजे या जिनेन्द्रस्य खेलति ।
बुद्धिमांस्तामुपासीत न कः शुद्धां सरस्वतीम् ॥६३॥

लब्धोदयायां हृदये यस्यां प्रक्षीयते नमः ।
पुण्यप्रभारलभ्यां तां क्लां कामप्युपास्महे ॥६४॥

इयमुचितपदार्थोल्लापने श्रव्यशोभा, बुधजनहितहेतुर्भावना पुष्पवाटी।
अनुदिनमित एव ध्यानपुष्पैर, दारैर्भवतु चरणपूजा जैनवाग्देवतायाः
॥६५॥

कमलगर्भविराजितभूघना, मणिकिरीटसुशोभितमस्तका ।
कनककुण्डलभूषितकर्णिका, जयतु सा जगतां जननी सदा
॥६६॥

सरस्सईए सत्तस्सरणोसवयणवसहीए।
जीयगुणेहिं कविवरा, मया वि नामेण जीवंति।

यत् कारुण्यकणस्पर्शात् सर्वः शब्दार्थविस्तरः ।
करामलकवद् भाति, शारदा सा प्रसीदतु ॥६७॥

विद्याबीजानि जानेयां नेमुषां दातुमुद्यता
अक्षमालाच्छलाद् धते, पाणौ सा पातु भारती ॥६८॥

प्रकटपाणितले जपमालिका, कमलपुस्तक वेणुवराधरा,
धवलहंससमा श्रुतवाहिनी, हरतु मे दुरितं भुवि भारती ॥६९॥

आजहर्यां नगर्यां कृतवति वसतिं वेद गर्भात्मजे वाग्,
मार्कण्डेशाननस्थां, त्रिदशपतिनुतां, सद्गुणासक्तचित्ताम् ।
निःसीम क्षेमकर्त्री विकचकजमुखीं वत्सलां सत्कवीनां,
प्रत्यूहव्यूहहर्त्री जगति तनुमतां त्वां सदैवं नुवेऽहम् ॥७०॥

या माति नौ सकलशास्त्रसरस्वती वः,
विश्वं पुनाति च सुपर्व सरस्वती वः ।
क्रीडां तनोति जिनवक्त्रसरस्वती व;
देयादियं सुखशतानि सरस्वती वः ॥ ॥७१॥

यस्याःप्रसादपरिवर्धितशुद्धबोधा,
पारं व्रजन्ति सुधियः श्रुततोयराशेः
सानुग्रहा मम समीहितसिद्धयेऽस्तु,
सर्वज्ञशासनरता श्रुतदेवताऽसौ ॥७२॥

धातुश्चतुर्मुखी कण्ठ-शृङ्गाटकविहारिणीम् ।
नित्यं प्रगल्भवाचालामुपितिष्ठे सरस्वतीम् ॥७३॥

वीणावादनदम्भेन शास्त्रतत्त्वविकासिका ।
हंसासनमुपासीना वाग्देवी श्रेयसेऽस्तु नः ॥७४॥

यस्याः प्रसादविरहे मूकत्वं सर्वदा स्फुटम् ।
तामेकां वागधिष्ठात्रीं महादेवीमुपास्महे ॥७५॥

सूक्ष्माय शुचये तस्मै नमो वाक् तत्त्वतन्तवे ।
विचित्रो यस्य विन्यासो विदधाति जगत्पटम् ॥७६॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती ।
प्राज्ञेतरपरिच्छंद वचसैव करोति या ॥७७॥

जलदुग्धनिर्णयविधौ यस्या वाहोऽपि विश्रुतो दक्षः ।
सा सदसत्त्वविबोधक वागीशा स्तान्ममाद्य गतिः ॥७८॥

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥७९॥

शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्बकृतार्थ सार्थवाहम् ॥८०॥

आशासु राशी भवदङ्गवल्ली भासैव दासीकृतदुग्धसिन्धुम् ।
मन्दस्मितैर्निन्दित सारदेन्दुं वन्देऽरविन्दासन सुन्दरि ! त्वाम् ॥८१॥
इन्द्रवज्रा.

वचांसि वाचस्पतिमत्सरेण साराणि लब्धुं ग्रहमण्डलीव ।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः ॥८२॥
उपजाति.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्योतिस्तमोहरमलोचनगोचरं तज्जिह्वादुरा सदरसं मधुनः प्रवाहम्।
दूरे त्वचः पुरकबन्धिपरं प्रपद्ये सारस्वतं किमपि कामदुघं रहस्यम्
।।८३।। वसन्त.

तवकरकमलस्थां स्फाटिकमक्षमालां
नखकिरणविभिन्नां दाडिमबीजबुद्ध्या।
प्रतिकलमनुकर्षन् येन कीरो निषिद्धः
स भवतु मम भूत्यै वाणि ते मन्दहासः ।।८४।। मालिनी.

हंसासीना हसन्ती मृदुमधुरकलां वादयन्तीं स्ववीणां,
तत्त्वग्रामं समस्तं प्रकटमविकलं सन्नयन्ती विकासम्।
मुक्तामालां दधाना गुणिगणमहिता स्तूयमाना सुरेन्द्रै,
र्वागीशा सुप्रसन्ना निवसतु वदनाम्भोरुहान्तः सदा मे ।।८५।।
स्रग्धरा.

ऐन्दवीव विमलाकलाऽनिशं भव्यकैरवविकाशनोद्यता।
तन्वतीनयविवेकभारतीः भारती जयति विश्ववेदिनः ।।
कृतसमस्तजगच्छुभवस्तुता, जितकुवादिगणाऽस्तभवस्तुता।
अवतु वः परिपूर्णनभा रती र्नुमरुते ददती जिनभारती ।।८६।।

अनादिनिधनाऽदीना धनादीनामतिप्रदा।
मतिप्रदानमादेयाऽनमा देयाज्जिनेन्द्रवाक् ।।८७।।

शीतांशुत्विषि यत्र नित्यमदधद् गन्धाढ्यधूलीकणान्
आलीकेसरलालसा समुदिताऽऽशु भ्रामरीभासिता।।
पायाद् वः श्रुतदेवता निदधती तत्राब्जकान्ती क्रमौ
नालीके सरलाऽलसा समुदिता शुभ्रामरी भासिता ।।८८।। शार्दूल.

भारति ! द्राग् जिनेन्द्राणां नवनौरक्षतारिके।
संसाराम्भोनिधा वस्मा-नवनौ रक्षतारिके ।।८९।।

कुर्वाणाऽणु पदार्थ दर्शनवशाद् भास्वत्प्रभाया स्वपा,
मानत्या जनकृत्तमोहरत ! मे शस्ताऽदरिद्रोहिका।
अक्षोभ्या तव भारती जिनपते ! प्रोन्मादिनां वादिनां,
मानत्याजनकृत् तमोहरतमे!स्तादरिद्रोहिका ।।९०।। शार्दूल.

परमततिमिरोग्रभानुप्रभा भूरिभंगैर्गभीरा,
भृशं विश्ववर्ये निकाय्ये वितीर्यात्परा
महति मतिमते हि ते शस्यमानस्य वासं,
सदाऽतन्वती तापदानन्दधानस्य साऽमानिनः।
जननमृति तरङ्ग निष्पारसंसारनीराकरान्त,
र्निमज्जज्जनोत्तार नौ भारती तीर्थकृत !
महति मतिमतेहितेशस्य मानस्य वासं सदा,
तन्वती तापदानं दधानस्य सामानिनः ।।९१।। अर्णवदण्डक

जिनेन्द्र ! भङ्गैः प्रसमंगभीराऽऽशु भारती शस्यतमस्तवेन।
निर्नाशयन्ती मम शर्म दिश्यात्, शुभाऽरतीशस्य तमस्तवेन ।।९२।।
उपजाति.

शरदिन्दु सुन्दररुचिश्चेतसि सा मे गिरांदेवी।
अपहृत्य तमः संततमर्थानखिलान्प्रकाशयतु ।।९३।।

सम्यग्दृशामसुमतां निचये चकार, सद्भा रतीरतिवरा मरराजिगे या।
दिश्यादवश्यमखिलं मम शर्मजैनी, सद्भारती रतिवरामरराजिगेया
।।९४।। वसंत.

हन्तिसमया गुणगणान्परिमोचयन्तीसाभाररतीशमवतां भवतोदमायाः।
ज्ञानश्रिये भवतु तत्पऽनोद्यतानां सा भारती शमवतां भवतोदमाया
।।९५।। वसंत.

यां द्राग् भवन्ति सुरमन्त्रिसमा नमन्तः,
संत्यज्य मोहमधियोऽप्य समानमन्तः।
वाग्देवता हतकुवादिकुलाभवर्णात्,
सा पातु कुन्दविकसन्मुकुलाभ वर्णा ।।९६।। वसंत.

यशो धत्ते न जातारि-शमना विलसन् न या।
साऽऽर्हती भारती दत्तां शमना विलसन्नया ।।९७।।

जिनस्य भारती तमो-वनागसङ्घनाशनीम्।
उपेतहेतुमुन्नता-वनागसं घनाशनीम्।। प्रमाणिका ०
वाग्देवी वरदीभूत - पुस्तिकाऽऽपद्मलक्षितौ।
अपौऽव्याद् बिभ्रती हस्तौ पुस्तिकापद्मलक्षितौ ।।९८।। अनु.

श्रुतनिधीशिनि ! बुद्धिवनाली
दवमनुत्तम सारचिता पदम्।
भवभियां मम देवि ! हरादरा
दवमनुत्तमसा रचितापदम् ।।९९।। द्रुत.

इति सम्पूर्णम्।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

શ્રી મહાવીર સ્વામિને નમઃ ॐ હ્રીં અર્હં નમઃ
શ્રી ગૌતમસ્વામિને નમઃ ॐ ઐં સરસ્વત્યૈ નમઃ
પરમોપાસ્ય શ્રી વિજય નેમિ-વિજ્ઞાન-કસ્તૂર-
ચંદ્રોદય સૂરીશ્વરેભ્યો નમઃ

# શ્રી સરસ્વતી દેવી પૂજન વિધિ...

- પૂર્વ / ઉત્તર દિશાએ શુદ્ધભૂમિ ઉપર શ્રી સરસ્વતીદેવીનું હ્રીંકાર યુકત પાંચ ધાન્યનું માંડલુ બનાવવું.
- સિંહાસનમાં શ્રી આદિનાથ ભગવાન અથવા શ્રી મહાવીર સ્વામી ની મૂર્તિ પધરાવવી.
- ૧૦૮ ગુણયુકત શ્રી સરસ્વતીદેવીનો યન્ત્ર થાળમાં પધરાવવો.
- સ્નાત્ર ભણાવવું.
- પ્રભુજીની ચંદન-કેસર-પુષ્પ-ધૂપ-દીપ-અક્ષત-નૈવેદ્ય-ફળ = અષ્ટ પ્રકારી પૂજા કરી યંત્ર સન્મુખ સજોડે કટાસણાં ઉપર બેસી હાથ જોડી સ્તુતિઓ બોલવી.
- પંચ - પરમેષ્ઠિ સ્મરણઃ
  अर्हन्तो भगवन्त इन्द्र महिता.....
- ચતુઃ શરણ મંગલઃ
  चत्तारि मंगलं...
- या कुन्देन्दु तुषार-हारधवला, या श्वेतपद्मासना
  या वीणावरदंडमण्डितकरा, या शुभ्रवस्त्रावृता
  या ब्रह्माच्युतशङ्करप्रभृतिभि र्देवैः सदा वन्दिता,
  सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।
  કમલદલ વિપુલ નયના, કમલ-મુખી, કમલ-ગર્ભ સમ ગૌરી,
  કમલે સ્થિતા ભગવતી, દદાતુ શ્રુતદેવતા સિદ્ધિં.
- निव्वाण मग्गे वरजाणकप्पं, पणासियासेसकुवाई दप्पं।
  मयं जिणाणं सरणं बुहाणं, नमामि निच्चं तिजगप्पहाणं ॥
- બોધાગાધં સુપદપદવી નીરપુરાઽભિરામં, જીવાઽહિંસા વિરલ લહરી સંગમાગાહ દેહં,
  ચૂલાવેલં ગુરુગમ મણિ સંકુલં દૂર પારં, સારં વીરાગમજલ નિધિં સાદરં સાધુ સેવે.
- श्री तीर्थंकर गणधर प्रसादात् एष योगः फलतु मे।
- પીઠિકા ઉપર ચારે બાજુ વાસક્ષેપ કરવો.
- ॐ नमो अरिहंताणं भगवईए सुअदेवयाए संतीदेवीए चउण्हं लोगपालाणं नवण्हं गहाणं दसण्हं दिग्पालाणं षोडश विज्जादेवीओ थंभणं कुरुकुरु ॐ ऐं अरिहंतदेवाय नमः स्वाहा।
- ભૂમિ પ્રમાર્જન :
  ॐ ह्रीं वातकुमाराय विघ्नविनाशकाय महीपूतां कुरु कुरु स्वाहा।
  (દર્ભ-ઘાસથી પ્રમાર્જન)
- ભૂમિ પ્રક્ષાલન :
  ॐ ह्रीं मेघकुमाराय धरां प्रक्षालय हूँ फट् स्वाहा।
  (પાણી છાંટવું)
- ભૂમિ શુદ્ધિ :
  ॐ भूरसि भूतधात्रिः सर्वभूतहिते भूमि-शुद्धिं कुरु कुरु स्वाहा।
  (ચંદન છાંટવું)
- વસ્ત્ર શુદ્ધિ : (વસ્ત્રો પર હાથ ફેરવતાં....)
  ॐ ह्रीं इवीं क्ष्वीं पाँ वाँ वस्त्रशुद्धिं कुरु कुरु स्वाहा।
- આસન શુદ્ધિ :
  જમણા હાથમાં પાણી લઈને 'સૌઃ' આ પ્રમાણે
  पृथ्वीं त्वया धृता लोका, देवि त्वं विष्णुना धृता।
  त्वं च धारय मां देवि, पवित्रं कुरु चासनम् ॥
  ॐ ऐं ह्रीं श्रीं ॐ ह्रीं आधारशक्ति कमलासनाय नमः।
  કુસુમાંજલિ આસન ઉપર નાંખીને પછી બેસવું.
- પંચાક્ષર મંત્ર સ્થાપના : (૩ વાર)
  ह्राँ ह्रीं हूं ह्रौं हः
  અ સિ આ ઊ સા
- પંચાંગ મંત્ર સ્નાન :
  ॐ अमले विमले सर्व तीर्थ जले पाँ वाँ इवीं क्ष्वीं
  अशुचिः शुचिर्भवामि स्वाहा।
- હૃદય શુદ્ધિ : (હૃદય ઉપર હાથ રાખીને...)
  ॐ विमलाय विमलचित्ताय इवीं क्ष्वीं स्वाहा।
- કલ્મષ-દહન (ભુજા સ્પર્શ)
  ॐ विद्युत्स्फुलिंगे महाविद्ये मम सर्व कल्मषं दह दह स्वाहा।
- રક્ષા મંત્ર : (૩ વાર બોલવું - ઉતરતાં-ચઢતાં તે તે સ્થાનને સ્પર્શ કરવો)

| ॐ | कु | रु | कु | ल्ले | स्वा | हा |
|---|---|---|---|---|---|---|
| મસ્તક | ડાબા હાથની સંધિ | ડાબી કુક્ષિ | ડાબો પગ | જમણો પગ | જમણી કુક્ષી | જમણા હાથની સંધિ |

- **સકલીકરણ : (૩ વાર ઉતરવું - ચડવું)**

| क्षि | प | ॐ | स्वा | हा |
|---|---|---|---|---|
| જાનુ | નાભિ | હૃદય | મુખ | શિખા. |

- રક્ષા - કવચ : (પરમેષ્ઠિ રક્ષા)
  ॐ नमो अरिहंताण ह्रीं हृदयं रक्ष रक्ष हूँ फट् स्वाहा।
  (હૃદય ઉપર)
  ॐ नमो सिद्धाणं हरहर शिरो रक्ष रक्ष हूँ फट् स्वाहा।
  (મસ્તક ઉપર)
  ॐ नमो आयरियाणं ह्रीं शिखां रक्ष रक्ष हूँ फट् स्वाहा।
  (શિખા ઉપર)
  ॐ नमो उवज्झायाणं एहि भगवति-चक्रे कवचवज्रिणि हूँ फट् स्वाहा।
  (ભુજા ઉપર)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ नमो लोए सव्व साहूणं क्षिप्रं साधय साधय कष्टं
वज्रहस्ते ! शूलिनि रक्ष रक्ष आत्मरक्षा सर्वरक्षा हूँ फट् स्वाहा।
(સર્વાંગ ઉપર)

- વાગ્દેવતા - ન્યાસ :

ऐं ह्रीं श्रीं अं आं ओं औं अः ब्लूँ वशिनी वाग्देवतायै नमः
(મસ્તક ઉપર)

ऐं ह्रीं श्रीं कं खं गं घं ङं क्लह्रीं कामेश्वरी वाग्देवतायै नमः
(લલાટે)

ऐं ह्रीं श्रीं चं छं जं झं ञं न्ब्लीं मोदिनी वाग्देवतायै नमः
(ભ્રમર વચ્ચે)

ऐं ह्रीं श्रीं टं ठं डं ढं णं द्लूं विमला वाग्देवतायै नमः (કંઠ ઉપર)
ऐं ह्रीं श्रीं तं थं दं धं नं ज्र्यीं अरुणा वाग्देवतायै नमः
(હૃદય ઉપર)

ऐं ह्रीं श्रीं पं फं बं भं मं हम्ल्व्यूं जयिनी वाग्देवतायै नमः
(નાભિ ઉપર)

ऐं ह्रीं श्रीं यं रं लं वं झम्र्यूं सर्वेश्वरी वाग्देवतायै नमः (ગુહ્યે)
ऐं ह्रीं श्रीं शं षं सं हं ळं क्षं क्ष्म्रीं कौलिनी वाग्देवतायै नमः
(મૂલાધારે)

- માતૃકાન્યાસ : (અક્ષર વિન્યાસ)

ब्रह्मणे ऋषये नमः (મસ્તક ઉપર)
गायत्री छन्दसे नमः (મુખ ઉપર)
श्री मातृका सरस्वतीदेवतायै नमः (હૃદય ઉપર)
हल्भ्यो बीजेभ्यो नमः (ગુહ્યે)
स्वरेभ्य शक्तिभ्यो नमः (પગ ઉપર)
बिन्दुभ्यः कीलकेभ्यो नमः (નાભિ ઉપર)
मम सरस्वती विद्यांगत्वेन न्यासे विनियोगाय नमः (કર સંપુટે)

ऍं ह्रीं श्रीं अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः
ऍं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः
ऍं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः
ऍं ह्रीं श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः
ऍं ह्रीं श्रीं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः
ऍं ह्रीं श्रीं अं यं रं लं शं षं हं ळं क्षं अः करतल करपृष्ठाभ्यां नमः

ऍं ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयाय नमः
ऍं ह्रीं श्रीं इं चं छं जं झं ञं ईं शिरसे स्वाहा
ऍं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं शिखायै वषट्
ऍं ह्रीं श्रीं एं तं थं दं धं नं ऐं कवचाय हुम्
ऍं ह्रीं श्रीं ओं पं फं बं भं मं औं नेत्रत्रयाय् वौषट्
ऍं ह्रीं श्रीं अं यं रं लं शं षं हं ळं क्षं अः अस्त्राय फट्

- પ્રાર્થના : (માતૃકાન્યાસ) (स्रग्धरा)

पंचाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षो-
देशांभास्वत्कपर्दा-कलितशशिकलामिन्दुकुन्दावदातम् ।
अक्षस्रक्कुम्भचिन्ता लिखितवरकरां त्रीक्षणामब्ज संस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ।।

- આત્મપ્રાણ પ્રતિષ્ઠા : (હૃદય ઉપર હાથ રાખીને)

ॐ आँ ह्रीं क्रों मम सर्वेन्द्रियाणि, ॐ आँ ह्रीं क्रों मम वाङ्मनस्त्वक् चक्षुः श्रोत्र जिह्वा घ्राण प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

- પ્રાર્થના : (स्रग्धरा)

रक्ताम्भोधिस्थप्रोतोल्लसदरुणसरोजाधिरुढा कराब्जैः,
पाशं कोदण्डमिक्षुद् भवमथ गुणमप्यङ्कुशं पंचबाणान् ।
बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या,
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ।।

- વજ્રપંજર સ્તોત્ર :

ॐ परमेष्ठि नमस्कारं सारं नवपदात्मकं ।
आत्मरक्षाकरं वज्रपंजराभं स्मराम्यऽहम् ।।
ॐ नमो अरिहंताणं शिरस्कं शिरसि स्थितं । (મસ્તક ઉપર)
ॐ नमो सव्वसिद्धाणं मुखे मुखपटं वरं ।। (મોઢા આગળ)
ॐ नमो आयरियाणं अंगरक्षातिशायिनि । (શરીર ઉપર)
ॐ नमो उवज्झायाणं आयुधं हस्तयोऽर्दृढम् ।। (બન્ને ભુજાઓ)
ॐ नमो लोए सव्वसाहूणं मोचके पादयो शुभे । (પગ ઉપર)
एसो पंच नमुक्कारो शिलावज्रमयी तले ।। (જમીન ઉપર)
सव्व पावप्पणासणो वप्रो वज्रमयो बहिः । (ચારે તરફ)
मंगलाणं च सव्वेसिं खादिरांगारखातिका ।।
(જમીન ઉપર ગોળ)

स्वाहान्तं च पदं ज्ञेयं पढमं हवइ मंगलं ।
वप्रोपरि वज्रमयं पिधानं देहरक्षणे ।।
(માથા ઉપરથી શરીર સુધી)

महाप्रभावा रक्षेयं क्षुद्रोपद्रवनाशिनी ।
परमेष्ठिपदोद्भुता कथिता पूर्वसूरिभिः ।।
यश्चैवं कुरुते रक्षां परमेष्ठिपदैः सदा ।
तस्य न स्याद् भयं व्याधि-राधिश्चापि कदाचनः ।।

- **ક્ષેત્રપાળપૂજન : (લીલા નાળિયેર ઉપર ચમેલીનું તેલ છાંટવું)**

ॐ क्ष्रां क्ष्रीं क्ष्रूं क्ष्रौं क्षः अत्रस्थ क्षेत्रपालाय स्वाहा ।
(ફૂલ - જાસુદ)

- **રક્ષાપોટલી મંત્ર :** (ગુરુ ભગવંત પાસે આ મંત્રે સાતવાર રક્ષાપોટલી મંત્રાવવી)

ॐ हैं (क्ष्रुं) क्ष्रूं फूट् किरिटि किरिटि घातय घातय परकृत-विघ्नान् स्फेटय स्फेटय सहस्रखण्डान् कुरु कुरु परमुद्रां छिन्द छिन्द परमन्त्रान् भिन्द भिन्द हूँ क्षः फूट् स्वाहा ।।

- **રક્ષા પોટલી બાંધવાનો મંત્ર :** (આ મંત્રે રક્ષા પોટલી બાંધવી)

ॐ नमोऽर्हते रक्ष रक्ष हूँ फूट् स्वाहा ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

• ૨૪ તીર્થંકર સ્થાપના :
ॐ आँ क्रौं ह्रीं श्रीं अर्हं श्री ऋषभ, अजित, संभव, अभिनन्दन, सुमति, पद्मप्रभ, सुपार्श्व, चन्द्रप्रभ, सुविधि, शीतल, श्रेयांस, वासुपूज्य, विमल, अनन्त, धर्म, शान्ति, कुन्थु, अर, मल्लि, मुनिसुव्रत, नमि, नेमि, पार्श्व, वर्धमान इत्यादि चतुर्विंशति जिनाः अत्र अवतरत अवतरत तिष्ठ तिष्ठ, ठः ठः स्वाहा।

• ગણધર સ્થાપના :
ॐ आँ क्रौं ह्रीं श्रीं गौतम इन्द्रभूति, अग्निभूति, वायुभूति, व्यक्त, सुधर्मा, मंडित, मौर्यपुत्र, अकंपित, अचलभ्राता, मेतार्य, प्रभास इत्यादि गणसंपत्समृद्धाः लब्धिनिधानाः गणधराः अत्र तिष्ठ तिष्ठ, ठः ठः स्वाहा।

• શ્રી સરસ્વતી સ્થાપના

• **આહ્‌વાન મંત્ર :** ॐ ह्रीं श्रीं जिनशासन-श्री द्वादशांगी अधिष्ठात्रि! श्री सरस्वती देवि ! अत्र अवतरत अवतरत संवौषट् नमः श्री सरस्वत्यै स्वाहा ।। (એક ડંકો)

**સ્થાપના મંત્ર :** ॐ ह्रीं श्रीं जिनशासन-श्री द्वादशांगी अधिष्ठात्रि ! श्री सरस्वती देवि ! अत्र तिष्ठ तिष्ठ ठः ठः नमः श्री सरस्वत्यै स्वाहा ।। (એક ડંકો)

**સંનિધાન મંત્ર :** ॐ ह्रीं श्रीं जिनशासन श्री द्वादशांगी अधिष्ठात्रि ! श्री सरस्वती देवि ! मम सन्निहिता भव भव वषट् नमः श्री सरस्वत्यै स्वाहा ।। (એક ડંકો)

**સંનિરોધન :** ॐ ह्रीं श्रीं जिनशासन श्री द्वादशांगी अधिष्ठात्रि ! श्री सरस्वती देवि ! पूजां यावदत्रैव स्थातव्यम् नमः श्री सरस्वत्यै स्वाहा ।। (એક ડંકો)

**અવગુંઠન :** ॐ ह्रीं श्रीं जिनशासन श्री द्वादशांगी अधिष्ठात्रि ! श्री सरस्वती देवि ! परेषामदृश्या भव भव फट् नमः श्री सरस्वत्यै स्वाहा ।। (એક ડંકો)

(અંજલિ મુદ્રાએ કરવું.)

**પૂજનમ્ :** ॐ ह्रीं श्रीं जिनशासन श्री द्वादशांगी अधिष्ठात्रि ! इमं पूजां प्रतीच्छ प्रतीच्छ नमः श्री सरस्वत्यै स्वाहा ।।

(આખી થાળી)

## ૧૦૮ ગુણયુક્ત શ્રી સરસ્વતી સ્તોત્ર : (બોલવું)

धीषणा धीर्मतिमेधा वाग् विभवा सरस्वती।
गीर्वाणी भारती भाषा ब्रह्माणी मागधि-प्रिया ।।१।।

सर्वेश्वरी महागौरी शङ्करी भक्तवत्सला।
रौद्री चाण्डालिनी चण्डी भैरवी वैष्णवी जया ।।२।।

गायत्री च चतुर्बाहुः कौमारी परमेश्वरी।
देवमाताऽक्षयाचैव नित्या त्रिपुर-भैरवी ।।३।।

त्रैलोक्य स्वामिनी देवी माङ्का कारुण्यसूत्रिणी।
शूलिनी पद्मिनी रुद्री लक्ष्मी पङ्कजवासिनी ।।४।।

चामुण्डा खेचरी शान्ता हुङ्कारा चन्द्रशेखरी।
वाराहि विजयान्तर्धा कर्त्री हर्त्री सुरेश्वरी ।।५।।

चन्द्रानना जगद्धात्री, वीणाम्बुजकरद्वया।
सुभगा सर्वगा स्वाहा जम्भिनी स्तम्भिनी स्वरा ।।६।।

काली कापालिनी कौलि विज्ञा रात्री त्रिलोचना
पुस्तकव्यग्रहस्ता च योगिन्यमितविक्रमा ।।७।।

सर्व सिद्धिकरी सन्ध्या खड्गिनी कामरुपिणी।
सर्व सत्य हिता प्रज्ञा शिवा शुक्ला मनोरमा ।।८।।

माङ्गल्यरुचिराकारा धन्या काननवासिनी।
अज्ञाननाशिनी जैनी अज्ञाननिशिभास्करी ।।९।।

अज्ञानजनमातात्व-मज्ञानोदधिशोषिणी।
ज्ञानदा - नर्मदा - गङ्गा सीता वागीश्वरी धृतिः ।।१०।

ऐंकारा मस्तका प्रीतिः ह्रींकार वदनाहुतिः।
क्लींकार हृदयाशक्तिः अष्टबीजानिराकृतिः ।।११।।

निरामया जगत्संस्था निष्प्रपंचा चलाऽचला।
निरुत्पन्ना समुत्पन्ना अनन्ता गगनोपमा ।।१२।।

पठत्यमूनि नामानि अष्टोत्तर शतानि यः।
वत्सं धेनुरिवायाति तस्मिन् देवि सरस्वती ।।१३।।

त्रिकालं च शुचिर्भूत्वा अष्टमासान् निरंतरं।
पृथीव्यां तस्य बंभ्रम्य तन्वन्ति कवयो यशः ।।१४।।

द्रुहिणवदनपद्मे राजहंसीव शुभ्रा,
सकलकलुषवल्ली कन्दकुद्दालकल्पा।
अमरशतनताऽङ्घ्रि कामधेनूः कवीनां,
दहतु कमलहस्ता भारती कल्मषं नः ।।१५।।

## ૨૪ તીર્થંકર પૂજન (અષ્ટપ્રકારી પૂજા)

ॐ आँ क्रौं ह्रीं श्रीं अर्हन् श्री ऋषभ - अजित - संभव-अभिनन्दन - सुमति - पद्मप्रभ - सुपार्श्व - चन्द्रप्रभ - सुविधि-
शीतल - श्रेयांस - वासुपूज्य - विमल - अनन्त - धर्म शान्ति- कुन्थु - अर - मल्लि - मुनिसुव्रत - नमि - नेमि - पार्श्व- वर्धमान इत्यादि चतुर्विंशति जिनेभ्यः

वं जलं समर्पयामि स्वाहा।
लं चन्दनं समर्पयामि स्वाहा।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हं पुष्पं समर्पयामि स्वाहा।
यं धूपं आघ्रापयामि स्वाहा।
रं दीपं दर्शयामि स्वाहा।
तं अक्षतं समर्पयामि स्वाहा।
वं नैवेद्यं समर्पयामि स्वाहा।
फुः फलं समर्पयामि स्वाहा।

- ११ ગણધર પૂજન (વાસક્ષેપ - ચૂર્ણ પૂજા)
  ॐ आँ क्रौं ह्रीं श्रीं अर्हन् श्री अनन्त लब्धि निधाना.
  श्री इन्द्रभूति - अग्निभूति- वायुभूति-व्यक्त - सुधर्मा-
  मण्डित - मौर्य्यपुत्र - अकम्पित - अचलभ्राता-मेतार्य-
  प्रभास इत्यादि गणधरेभ्यः गंधादीन् समर्पयामि स्वाहा।

- (१) પંચામૃતના કળશો હાથમાં લઈ નીચે લખેલ શ્રી 'सरस्वती स्तोत्र' ના ૧-૧ શ્લોક બોલી - બાર ગુણોના મંત્રો બોલી પક્ષાલ કરવો. તે વખતે ૧૨ ફળ ૧૨ નૈવેદ્ય લઈ ઉભા રહેલ વ્યક્તિએ ફળ-નૈવેદ્ય માંડલામાં પધરાવવા. કુમારિકાએ બે દિવા માંડલામાં પધરાવવા.

## મહામંત્રગર્ભિત શ્રી સરસ્વતી સ્તોત્ર

ॐ ऐं ह्रीं श्रीं मन्त्ररुपे विबुधजननुते देवदेवेन्द्रवंद्ये,
चञ्चच्चन्द्रावदाते क्षपित-कलिमल हारनिहारगौरे।
भीमे भीमाट्टहास्ये भवभयहरणे भैरवी भीमधीरे,
ह्रीं ह्रीं ह्रींकार नादे मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥१॥

ॐ ह्रीं धिषणायै (१) धीयै (२) मत्यै (३) मेधायै (४) वाचे (५) विभवायै (६) सरस्वत्यै (७) गिरे (८) वाण्यै (९) भारत्यै (१०) भाषायै (११) ब्रह्मण्यै (१२) ॥ श्री सरस्वत्यै जलं चन्दनं पुष्पं धूपं दीपं अक्षतं नैवेद्यं फलानि यजामहे स्वाहा ॥

हा पक्षे बीजगर्भे सुरवररमणी-चर्चितानेकरुपे,
कोपं वं झं विधेयं धरितधरिवरे योगनियोगमार्गे।
हं सं सः स्वर्गराजप्रतिदिननमिते प्रस्तुतालापपाठे,
दैत्येन्द्रै ध्यायमाने मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥२॥

ॐ ह्रीं मागधप्रियायै (१३) सवेश्वर्यै (१४) महागौर्यै (१५) शाङ्कर्यै (१६) भक्तवत्सलायै (१७) रौद्रयै (१८) चाण्डालिन्यै (१९) चण्डयै (२०) भैरव्यै (२१) वैष्णव्यै (२२) जयायै (२३) गायत्र्यै (२४) श्री सरस्वत्यै जलं चन्दनं पुष्पं धूपं दीपं अक्षतं नैवेद्यं फलानि यजामहे स्वाहा ॥

दैत्यै दैत्यारिनाथै र्नमितपदयुगे भक्तिपूर्वं त्रिसन्ध्यम्,
यक्षैः सिद्धैश्चनप्रैरहमहमिकया देहकान्त्याऽतिकान्तैः।
आँ ईं ॐ विस्फुटाभाक्षर-वरमृदुना सुस्वरेणासुरेणाऽ,
त्यन्तं प्रोद्गीयमाने मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥३॥

ॐ ह्रीं चतुर्बाहवे (२५) कौमार्यै (२६) परमेश्वर्यै (२७) देवमात्रे (२८) अक्षयायै (२९) नित्यायै (३०) त्रिपुरभैरव्यै (३१) त्रैलोक्यस्वामिन्यै (३२) देव्यै (३३) माङ्कायै (३४) कारुण्यसूत्रिण्यै (३५) शूलिन्यै (३६) श्री सरस्वत्यै जलं... स्वाहा।

क्षाँ क्षीं क्षूँ क्षः स्वरुपे हन विषमविषं स्थावरं जंगमं वा
संसारे संसृतानां तव चरणयुगे सर्वकालं नराणाम्
अव्यक्ते व्यक्तरुपे प्रणतनरवरे ब्राह्मरुपे स्वरुपे
ऐं ऐं क्लूं योगिगम्ये मम मनसि सदा शारदे ! ॥४॥

ॐ ह्रीं पद्मिन्यै (३७) लक्ष्म्यै (३८) पङ्कजवासिन्यै (३९) चामुण्डायै (४०) खेचर्यै (४१) शान्तायै (४२) हुङ्कारायै (४३) चन्द्रशेखर्यै (४४) वाराहयै (४५) विजयायै (४६) अन्तर्धायै (४७) कर्त्र्यै (४८) श्री सरस्वत्यै जलं... स्वाहा..

सम्पूर्णाऽत्यन्तशोभैः शशधरधवलै रासलावण्यभूतैः,
रम्यैः स्वच्छैश्च कान्ते र्निजकरनिकरैश्चन्द्रिकाकारभासैः।
अस्माकीनं भवाब्जं दिनमनुसततं कल्मषं क्षालयन्ती,
श्राँ श्रीं श्रूँ मन्त्ररुपे मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥ ५ ॥

ॐ ह्रीं हर्त्र्यै (४९) सुरेश्वर्यै (५०) चन्द्राननायै (५१) जगद्धात्र्यै (५२) वीणाम्बुजकरद्वयायै (५३) सुभगायै (५४) सर्वगायै (५५) स्वाहायै (५६) जम्भीन्यै (५७) स्तंभिन्यै (५८) ईश्वरायै (५९) काल्यै (६०) श्री सरस्वत्यै जलं... स्वाहा।

भाषे पद्मासनस्थे जिनमुखनिरते पद्महस्ते प्रशस्ते,
प्राँ प्रीँ प्रूँ प्रः पवित्रे हरहरदुरितं दुष्टजं दुष्टचेष्टं।
वाचां लाभाय भक्त्या त्रिदिव युवतिभिः प्रत्यहं पूज्यपादे,
चंडे चंडीकराले मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥ ६ ॥

ॐ ह्रीं कापालिन्यै (६१) कौल्यै (६२) विज्ञायै (६३) रात्र्यै (६४) त्रिलोचनायै (६५) पुस्तकव्यग्रहस्तायै (६६) योगिन्यै (६७) अमितविक्रमायै (६८) सर्वसिद्धिकर्यै (६९) सन्ध्यायै (७०) खड्गिन्यै (७१) कामरुपिण्यै (७२) श्री सरस्वत्यै जलं... स्वाहा।

नम्रीभूतक्षितीशप्रवरमणिमुकुटोद्‌धृष्टपादारविन्दे,
पद्मास्थे पद्मनेत्रे गजगतिगमने हंसयाने विमाने।
कीर्त्तिश्रीबुद्धि-चक्रे जयविजयजये गौरी गंधारीयुक्ते,
ध्येया ध्येयस्वरुपे मम मनसि सदा शारदे ! देवि ! तिष्ठ ॥ ७ ॥

ॐ ह्रीं सर्वसत्वहितायै (७३) प्रज्ञायै (७४) शिवायै (७५) शुक्लायै (७६) मनोरमायै (७७) मांङ्गल्यरुचिकारायै (७८) धन्यायै (७९) काननवासिन्यै (८०) अज्ञाननाशिन्यै (८१) जैन्यै (८२) अज्ञाननिशिभास्कर्यै (८३) अज्ञानजनमात्रे (८४) श्री सरस्वत्यै जलं... स्वाहा।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्युज्ज्वालाप्रदीप्तां प्रवरमणिमयीमक्षमालां सुरुपां,
रम्यावृत्ति र्धरित्री दिनमनुसततं मंत्रकं शारदं च।
नागेन्द्रैरिन्द्रचन्द्रै मंनुजमुनिजनैः संस्तुता या च देवी,
कल्याणं सा च दीव्यं दिशतु मम सदा निर्मलं ज्ञान रत्नम् ॥८॥

ॐ ह्रीं अज्ञानोदधिशोषिण्यै (८५) ज्ञानदायै (८६) नर्मदायै (८७) गङ्गायै (८८) सीतायै (८९) वागीश्वर्यै (९०) धृत्यै (९१) ऐंकार मस्तकायै (९२) प्रीत्यै (९३) ह्रींकारवदनायै (९४) हृत्यै (९५) क्लीं करद्वयायै (९६) श्री सरस्वत्यै जलं... स्वाहा।

करबदरसदृशमखिल-भुवतलं यत् प्रसादतः कवयः।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ९ ॥

ॐ ह्रीं शक्त्यै (९७) अष्टबीजायै (९८) निरक्षरायै (९९) निगमयायै (१००) जगत्संस्थायै (१०१) निःप्रपञ्चायै (१०२) चञ्चलायै (१०३) चलायै (१०४) निरुत्पन्नायै (१०५) समुत्पन्नायै (१०६) अनन्तायै (१०७) गगनोपमायै (१०८) भगवत्यै वाग्देवतायै वीणापुस्तकमौक्तिकाक्षवलय श्वेताब्ज - मण्डितकरायै शशधरनिकर - गौरिहंसवाहनायै श्री सरस्वत्यै जलं स्वाहा।

## श्री सरस्वती देवी पूजन :

१ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै वं जलं समर्पयामि स्वाहा।

२ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै लं चन्दनं समर्पयामि स्वाहा।

३ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै लं गन्धं समर्पयामि स्वाहा।

४ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै हं पुष्पं समर्पयामि स्वाहा।

५ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै यं धूपं आघ्रापयामि स्वाहा।

६ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै रं दीपं दर्शयामि स्वाहा।

७ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै तं अक्षतं समर्पयामि स्वाहा।

८ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै वं नैवेद्यं समर्पयामि स्वाहा।

९ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै फुः फलं समर्पयामि स्वाहा।

१० ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै सं ताम्बूलं समर्पयामी स्वाहा।

११ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै वस्त्रं समर्पयामि स्वाहा।

१२ ॐ ऐं ह्रीं श्रीं क्लीं श्री श्रुतदेवी सरस्वत्यै अलंकाराणि समर्पयामि स्वाहा।

### પ્રાર્થના :

(મંદાક્રાન્તા)

एषा भक्त्या तव विरचिता या मया देवि पूजा,
स्वीकृत्यैनां सपदि सकलान् मेऽपराधान् क्षमस्व।
न्यूनं यत्तत् तव करुणया पूर्णनामेतु सद्यः,
सानन्दं मे हृदयकमले तेस्तु नित्यं निवासः ॥

(માલિની)

चरणनलिनयुग्मं पंकजैः पूजयित्वा,
कनककमलमालां कण्ठदेशेऽर्पयित्वा।
शिरसि विनिहितोऽयं रत्नपुष्पांजलि स्ते,
हृदयकमलमध्ये देवि ! हर्षं तनोतु ॥

## श्री बप्पभट्टिसूरिकृत अनुभूत सिद्ध सारस्वत स्तवः।

(દ્રુતવિલંબિત)

कलमरालविहङ्गमवाहना सितदुकुल-विभूषणलेपना।
प्रणतभूमिरुहामृतसारिणी प्रवरदेहविभाभरधारिणी ॥१॥

अमृतपूर्णकमण्डलुहारिणी त्रिदशदानवमानवसेविता।
भगवती परमैव सरस्वती मम पुनातु सदा नयनाम्बुजम् ॥२॥

जिनपतिप्रथिताखिलवाङ्मयी गणधराननमण्डपनर्तकी।
गुरुमुखाम्बुजखेलनहंसिका विजयते जगति श्रुतदेवता ॥३॥

अमृतदीधिति-बिम्ब समाननां त्रिजगतिजननिर्मितमाननाम्।
नवरसामृतवीचि-सरस्वतीं प्रमुदितः प्रणमामि सरस्वतीम् ॥४॥

विततकेतकपत्रविलोचने विहित संसृति-दुष्कृतमोचने।
धवलपक्षविहङ्गमलाञ्छिते जय सरस्वति ! पूरित वाञ्छिते ॥५॥

भवदनुग्रहलेशतरङ्गिता स्तदुचितं प्रवदन्ति विपश्चितः।
नृपसभासु यतः कमलाबला- कुचकला ललनानि वितन्वते ॥६॥

गतधना अपि हि त्वदनुग्रहात् कलितकोमल-वाक्यसुधोर्मयः।
चकितबालकुरङ्गविलोचना जनमनांसि हरन्तितरां नराः ॥७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

करसरोरुहखेलनचञ्चला तव विभाति वरा जपमालिका।
श्रुतपयोनिधिमध्यविकस्वरोज्ज्वलतरङ्ग कलाग्रहसाग्रहा ॥८॥

द्विरदकेसरिमारिभुजङ्गमा सहनतस्कररराजरुजां भयम्।
तव गुणावलिगानतरङ्गिणां न भविनां भवति श्रुतदेवते ॥९॥

ॐ ह्रीं क्लीं ब्लूँ ततः श्रीं तदनुहसकल ह्रीं अथो ऐं नमोन्ते,
लक्षं साक्षाज्जपेद्यः कर समविधिना सत्तपा ब्रह्मचारी।
निर्यान्तीं चन्द्रबिम्बात् कलयतिमनसा त्वां जगच्चन्द्रिकाभां,
सोत्यर्थं वह्निकुण्डे विहितघृतहुतिः स्याद् दशांशेन विद्वान् ॥१०॥

रे रे लक्षणकाव्यनाटक कथा चम्पूसमालोकने,
क्वायासं वितनोषि बालिश मुधा किं नम्रवक्त्राम्बुजः।
भक्त्याराधय मन्त्रराजसहितां दिव्यप्रभां भारतीं,
येनत्वं कवितावितान सविता द्वैत प्रबुद्धायसे ॥११॥

चञ्चच्चन्द्रमुखी प्रसिद्ध महिमा स्वाच्छन्द्यराज्यप्रदा,
ऽनायासेन सुरासुरेश्वरगणैरभ्यर्चिता भक्तितः।
देवी संस्तुत वैभवा मलयजा लेपाङ्गरङ्गद्युतिः,
सा मां पातु सरस्वती भगवती त्रैलोक्यसञ्जीवनी ॥१२॥

स्तवनमेतदनेकगुणान्वितं पठति यो भविकः प्रमनाः प्रगे।
स सहसा मधुरै र्वचनामृतै र्नृपगणानपि रञ्जयति स्फुटम् ॥१३॥

॥ इति सरस्वतिस्तव सम्पूर्णः ॥

## સરસ્વતીનો રક્ષા દોરો

પૂજાવિધિ પશ્ચાત્ ૨૭ વાર મનમાં સંકલ્પ પૂર્વક નીચેનો મંત્ર બોલતાં જવું અને પ્રત્યેક મંત્રના અંતે દોરામાં એક ગાંઠ વાળવી. કુલ ૨૭ ગાંઠનો દોરો બનાવવો -

ॐ ह्रीं क्लीं ब्लूँ श्रीं हसकल ह्रीं ऐं नमः।

## 'સરસ્વતી મા'ની આરતી :

જય જય આરતી દેવી તમારી, આશાપૂરો હે માત અમારી,..૧.
વીણા પુસ્તક કર ધરનારી, અમને આપો બુદ્ધિ સારી... ૨.
જ્ઞાન અનંત હૃદય ધરનારી, તમને વંદે સહુ નરનારી....૩.
માત સરસ્વતી સ્તુતિ તમારી, કરતાં જગમાં જય જયકારી. ૪.
જય...

આરતી કરૂં મા ભારતી તારી, જ્યોતિ રૂપે તું વિઘન વિકારી,. ૧.
જ્ઞાન પ્રકાશે તિમિર વિનાશે, વાસે મનમાં ભાવના સારી... ૨.
તું વિશ્વમાતા જગવિખ્યાતા, પ્રાતા કહીયે મોહનગારી... ૩.
કષ્ટને કાપો શાંતિને આપો, કરો નિર્મલ દેહ હમારી.... ૪.
આરતી..

પછી નવકાર, ઉવસગ્ગહરં, શ્રી બૃહચ્છાંતિ બોલી અખંડધારાએ શાંતિ કળશ કરવો. છેલ્લે નવકાર બોલી સાથિયા પર ઘડો પધરાવવો.

ત્યારબાદ ઈરિયાવહી કરી ભગવાનનું અથવા શ્રુતજ્ઞાનનું ચૈત્યવંદન કરી

**ક્ષમાપના :-**

आज्ञाहीनं क्रियाहीनं मन्त्रहीनं च यत्कृतं।
तत्सर्वं कृपया देवि ! क्षमस्व परमेश्वरि ! ॥
आह्वानं नैव जानामि न जानामि विसर्जनं।
पूजाविधिं न जानामि प्रसीद परमेश्वरि ॥
देहबुद्धया तु दासोऽहं जीवबुद्धया त्वदंशकः।
आत्मबुद्धया त्वमेवाऽहं इतिमे निश्चितामति ॥
ॐ क्षेमं भवतु सुभिक्षं, सस्यं निष्पद्यतां जयतु धर्मः।
शाम्यन्तु सर्व रोगाः ये केचिदुपद्रवा लोके ॥

**વિસર્જનવિધિ :-**

ॐ विसर विसर श्री तीर्थंकराः श्री गणधराः श्री श्रुतदेवी सरस्वती आदि-

सर्वे स्वस्थानं गच्छन्तु गच्छन्तु पुनरागमनाय प्रसीदन्तु प्रसीदन्तु स्वाहा ॥

**। समाप्तम्।**

## સરસ્વતી વંદના

- સ્વામી શિવાનંદ

માતુ સરસ્વતી વિદ્યા વરસતી જ્ઞાન ગુણોકી ખાણી હૈ
તુ હી સતી સાવિત્રી શારદા તુ હી માતુ ભવાની હૈ
લક્ષ્મી સીતા-ઉમા અમ્બિકે તુ હી રાધા રાની હૈ
પરા-પશ્યન્તી-મધ્યમા-વૈખરી તુ હી ચારોં વાણી હૈ ૧.

અંડજ પિંડજ ઉદ્ભિજ સ્વેદજ તુ હી ચારો જ્ઞાની હૈ
ઓંકાર મંકાર રંકારાદિ સબકે બીચ સમાની હૈ
સ્વર-વ્યંજન મેં ધ્યાન રહકર સબકો રહત લોભાની હૈ
બ્રાહ્મણ-ક્ષત્રિય-વૈશ્ય-ક્ષુદ્ર સબ વર્ણોમેં બીચ સુજાની હૈ ૨.

અર્થ-ધર્મ-અરુ કામ મોક્ષ તુમ દેને મેં વરદાની હૈ
જાગ્રત સ્વપ્ન સુષુપ્તિ તુરીયા ઈન સબકી અધિષ્ઠાની હૈ
ઋદ્ધિ સિદ્ધિ લઘિમા ગરિમા સબ સિદ્ધિઓ કી દાની હૈ
યહ આરતી જો ગાવે, વિદ્યા પાવે શિવાનંદ કહ ધ્યાની હૈ ૩.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## સદ્યવરદા શ્રી સરસ્વતી દેવી









"ગમે આંખડી દીર્ઘ જે પૂતકારી,
રમે કર્ણમાં કનક કુંડળ ભારી,
સમે હસ્તમાં માળને પોથીસારી,
સદા ભક્તને રાખજે ચિત્તમાંહી."

Jain Education International For Private & Personal Use Only www.jainelibrary.org




પાલા (બંગાળ) પાલનપુર - વડોદરા વિગેરે પ્રા[illegible]
નયનાનંદી મા સરસ્વતી દેવીની મૂર્તિઓ




Jain Education International
For Private & Personal Use Only
www.jainelibrary.org




Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राचीन
क
सरस्व



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ा अर्वाचीन
# ात्मक
# ती देवीयाँ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# સરસ્વતી પ્રસાદ

વિશ્વવંદ્યા ! સદ્યવરદા ! ભક્ત વત્સલા !,
હે માં ભગવથી સરસ્વતી !
કેટલો બધો મીઠો મધુરો શબ્દ છે 'મા'
તારો 'મા' શબ્દ ઉચ્ચારતાં જ
મોં ભરાય જાય છે, હૈયું તૃપ્ત થાય છે,
ઈચ્છાઓ પરિતોષ પામે છે,
ઘણું બધું માંગવાનુમન હતું પણ 'મા'
તારી અસ્મિતા જ અતિ ભવ્ય છે કે
ઈચ્છાઓ - કામનાઓનું અસ્તિત્વ જ
વલીન થઈ જાય છે, છતાંય તું
આપ્યાં વિના રહી જ ન શકે તો.......

* અમારા મોહ કપાટને સદ્ય ભેદી, અજ્ઞાન-તમસ્-કુમતિનો સર્વથા વિનાશ કરજે.
* મનના વિકલ્પ - વિમોહ - વિકૃતિઓને દૂર કરજે.
* દિલની દુર્મતિ-દારિદ્રય-દીનતા દૂર કરજે.
* પાપ-તાપ-સંતાપ શમાવી શાંતિ-સમતા-સમાધિ આપજે.
* વિદ્યા - જ્ઞાન - બુદ્ધિ - પ્રજ્ઞાના પ્રકર્ષને આપજે.
* અખિલ વિશ્વના સૌભાગ્ય કાજે નિઃસીમ કરૂણા-મૈત્રી-પ્રેમની પાવનગંગા, સમસ્ત લોકમાં અસ્ખલિત વહાવજે અને
* અનંત શકિત-સમૃદ્ધિ-સિદ્ધિના દ્વાર ઉઘાડી જાજવલ્યમાન આત્મજ્યોતિરૂપ કેવલજ્ઞાનની સાદ્યંત પ્રણેતા બનજે હોં.



Jain Education International For Private & Personal Use Only www.jainelibrary.org
MULTY GRAPHICS